...नि
...त
...जिससे
...ही हो
... बीच में पड़
...रण उक्त बालिका तो
...न्तु उसे चिन्ताजनक
...स्थानीय शिवप्रसाद गुप्त
... भर्ती कराया गया है।
... दो गहरी चोटें लगी
...हत्या का कारण तथा
...का नाम पता अज्ञात
...र रेलवे पुलिस मामले
...ा रही है। गत १२ मई
... रेलवे लाइन पर ट्रेन
...के कारण एक युवती के
... गये थे तथा बाद में
...ते समय उसकी मृत्यु

...मा० शिक्षक संघ ...न परिषद के नव- ...सदस्यों का स्वागत

...१६ मई। गत ६ बजे ...या इण्टर कालेज, में ...० शिक्षक संघ, जन पद ... अध्यक्ष श्री जगन्नाथ ... अध्यक्षता में संघ के ...पदके नवनिर्वाचित सदस्य ...पाण्डेय तथा श्री हृदय ...सिंह का स्वागत शाखा ... अध्यक्षों मन्त्रियों एवं ...कर्ताओं द्वारा किया गया। ... उत्तर देते हुए परिषद ...ने संघ के भावी कार्यक्रम ...डाला एवं अध्यापक वर्ग ...सन दिया कि हम वेतन ...के प्रश्न को हल कराने में ...

काशी में महिलाओं का राहचलना दूभर: गुण्डई की पराकाष्ठा


काशी, १६ मई। कल सायं ४ बजे दुलहिन जी रोड पर मैदागिन की ओर जाती हुई एक मारवाड़ी महिला की छाती पकड़ने और उसके साथ अभद्र व्यवहार करने का समाचार मिला है।

कहाजाता है कि यदि उस समय यहां के एक प्रमुख कांग्रेसी कार्यकर्ता न आ जाते तो बदमाश की नियत कुछ और ही थी। उक्त प्रमुख कांग्रेसी कार्यकर्ता ने उस युवक का हांथ पकड़ लिया और दो चार छड़ी जमाया भी। घटना के बाद वहां काफी संख्या में नागरिक एकत्र हो गये किन्तु महिला शर्म के मारे जब कतरा कर चली गई तो नागरिकों ने उस शोहदे को भी छोड़ दिया।

ज्ञातव्य है कि गत शुक्रवार की रात में लगभग ६॥ बजे उसी स्थान से बहनोई के षडयन्त्र से गुण्डोंने एक युवती को दो घंटे तक गायब रखा था।

श्रीसंन्यास गीता ।

धर्मशिक्षा विस्तार के निमित्त तथा साधु संन्यासियों के मंगल के लिये बिना मूल्य वितरणार्थ मुद्रित ।





श्रीभारतधर्म महामंडल
प्रधान कार्यालय, जगतगंज, बनारस केण्ट ।

ॐ तत्सत्

निवेदन

भारतखण्डमें लाखों लाखों संन्यासी और साधुगण हैं, परन्तु वस्तुतः उनके कल्याणार्थ और उनकी साधनपद्धतिके सहायतार्थ न कोई निबन्ध-ग्रन्थ और न कोई पद्धतिग्रन्थ पाया जाता था। श्रीभारतधर्ममहामंडलके अनुसन्धान विभाग द्वारा "संन्यासधर्मपद्धति" नामक पद्धतिग्रन्थ अलग प्रकाशित हुआ है। संन्यासधर्मपद्धतिकी अनेक प्रतियाँ विद्वान् साधु संन्यासियोंमें और ऐसे मठोंमें, जहाँ पाठशालायें हैं, विना मूल्य बाँटी गई हैं। संन्यासधर्मपद्धतिके द्वारा सब श्रेणीके साधु संन्यासियोंकी शिक्षा, दीक्षा और आध्यात्मिक अधिकारकी उन्नतिके लिये यथेष्ट सहायता मिलेगी।

"संन्यासधर्मपद्धति" जिस प्रकार साधु-संन्यासियोंके लिये पद्धति-ग्रन्थ है उसी प्रकार "श्रीसंन्यास गीता" भी निबन्ध ग्रन्थ है। इसके द्वारा सब श्रेणीके साधु-संन्यासी और यहाँ तक कि गृहस्थगण यथेष्ट ज्ञान लाभ कर सकेंगे। इसके पूर्वार्द्धमें वर्णाश्रम उपयोगी धर्मोपदेश और उत्तरार्द्धमें साधु-संन्यासियोंके उपयोगी मानवधर्मोपदेश विशेषरूपसे वर्णित है। इसके द्वारा साधु-संन्यासियोंको धर्मशिक्षा प्राप्तिमें बहुत ही लाभ होना सम्भव है। यह ग्रन्थ-रत्न हिन्दी-भाषा, बंगला-भाषा और मराठी-भाषामें अनुवादसहित पहले प्रकाशित हो चुका है। अबकी यह मूल ग्रन्थ साधु-संन्यासियोंमें बिना-मूल्य बाँटनेके लिये प्रकाशित किया जाता है। विद्वान् साधु-संन्यासियोंके अनुरोधपत्र आने पर अथवा साधु-संन्यासियोंके ऐसे मठ जहाँ पाठशालायें हैं, उनकेपत्र आने पर यह ग्रन्थ बिना-मूल्य देनेके लिये श्रीभारतधर्म महामंडलकी मंत्रि-सभाने आज्ञा दी है।

अध्यक्ष—श्रीभारतधर्ममहामंडल, शास्त्रप्रकाशविभाग,

महामंडलकार्यालय, बनारस कैण्ट।

ॐ नमः श्रीसच्चिदानन्दाय ।

श्रीसन्न्यासगीता

प्रथमोऽध्यायः ।

अनाद्यनन्तवैराजलीलैश्वर्यविभावन ! देशकालाऽपरिछिन्न ! जयस्वामिन्नयोऽस्तु ते ॥ १ ॥ नमामि जगदुत्पत्तिस्थितिप्रलयकारणम् ! सर्वात्मानं परैश्वर्य्यमवाङ्मनसगोचरम् ॥ २ ॥ कर्मसाक्षिन् ! भक्तचित्तविहारिन् ! भूतभावन ! सर्वबुद्धिप्रेरकत्वात् स्मृतो लोके जगद्गुरुः ॥३॥ प्रार्थयेऽहं ततो देव ! कृपया प्राणिनां धियः । जगत्कल्याणैकहेतुज्ञानमार्गे प्रवर्तय ॥ ४ ॥ प्रयागे नैमिषारण्ये विशालायां त्रिपुष्करे ! गङ्गासरस्वतीतीरे नर्मदायास्तटे तथा ॥ ५ ॥ तापीगोदावरीरेवायमुनागण्डकीतटे । हरिद्वारे कुरुक्षेत्रे तीर्थेष्वन्येष्वपि स्वयम् ॥ ६ ॥ ऋषयो मुनयः सिद्धा महात्मानश्चरन्ति यत् । तज्जगन्मङ्गलायेति निश्चितं तत्त्वदर्शिभिः॥७॥ सन्तः कारुणिका नित्यं तीर्थव्याजेन सङ्गताः । दुष्कृतानि व्यपोहन्ति दिव्यज्ञानोपदेशिनः ॥ ८ ॥ नानाशास्त्रकथाख्यानकथनश्रवणादिभिः । उद्धरन्ति जनान् सर्वान् पावयन्ति परस्परम् ॥ ९ ॥ तस्मात्सर्वात्मना नूनं सङ्गं कुर्वीत साधुभिः । सर्वोपकारनिरताः सन्तः संसारतारकाः ॥ १० ॥ अस्ति वै नैमिषारण्यं सुप्रसिद्धं तपोवनम् । ऋषिभिर्मुनिभिर्जुष्टमनेकाश्रमशोभितम् ॥ ११ ॥ रसालैः सालहिन्तालैः प्रियालैश्च प्रियङ्गुभिः । तालैस्तमालैर्मन्दारैर्नागपुन्नागचम्पकैः ॥ १२ ॥ द्राक्षेक्षुरम्भाजम्बूभिः कल्पवृक्षसमृद्धिभिः । पनसाश्वत्थन्यग्रोधैः पूगैः किंशुकचन्दनैः ॥ १३ ॥ कुन्दैः कुरबकैर्नीपैर्दिव्यपुष्पफलच्छदैः । द्रुमैः कामदुघैरन्यैः प्रपूर्णश्चातिशोभनम् ॥१४॥ मनोज्ञकुसुमामोदनानावीरुद्विराजितम् । मल्लिकामाधवीजातिवासन्तीभिः सुमण्डितम् ॥१५॥ सरित्सरोभिरच्छोदैर्लसद्रुचिरवालुकैः । कुमुदोत्पलकल्हारशतपत्रादिशोभितैः ॥१६॥

हंससारसकादम्बचक्रारण्धकलस्वनैः । गुञ्जद्भ्रमरझङ्कारनादितैः
समलङ्कृतम् ॥ १७ ॥ फलमूलाशनैर्दान्तैश्चारुकृष्णाजिनाम्बरैः ।
सूर्यवैश्वानरसमैस्तपसा भावितात्मभिः ॥ १८ ॥ महर्षिभिर्मोक्षपरै-
र्यतिभिर्नियतेन्द्रियैः । ब्रह्मभूतैर्महाभागैरुपेतं ब्रह्मवादिभिः ॥ १९ ॥
अब्भक्षैर्वायुभक्षैश्च पर्णाहारैस्तथैव च । चीरवल्कलसंवीतैः सर्वदाऽ-
ध्युषितं शिवम् ॥ २० ॥ अदंशमशकं रम्यमनालोकितदुर्जनम् ।
अश्रुताधिव्याधिदुःखमवितर्क्यतपःफलम् ॥ २१ ॥ यत्र सिंहादयो
हिंस्रा अपि सौहार्दमास्थिताः । निर्वैराः क्रौर्यनिर्मुक्ताश्चरन्त्यैणैश्च
गोकुलैः ॥ २२ ॥ शकुन्ता यत्र दृश्यन्ते मधुरस्वरगायनाः ।
ऋषिघुष्टाः सामगीतीर्गायन्ति शुकसारिकाः ॥ २३ ॥ तत्रैकदा
पुण्यदेशे नैमिषे कल्मषद्विषि । समवेता महात्मानः सिद्धा ब्रह्मर्षि-
सत्तमाः ॥ २४ ॥ नाना तपःप्रदेशेभ्य आश्रमेभ्यश्च सर्व्वतः ।
तीर्थेभ्यो विविधेभ्यश्च प्रयता लोकपावनाः ॥ २५ ॥ सशिष्याः
साग्नयः शान्ताः पश्यन्तो वनमुत्तमम् । पावयन्तो जनान्मार्गे
समाजग्मुः कृपालवः ॥ २६ ॥ अल्पज्ञान् प्राणिनः सर्वान् सत्सङ्गे-
नोद्दिधीर्षवः । तीर्थयात्राप्रसङ्गेन भूमौ सन्तश्चरन्ति हि ॥ २७ ॥
स्नाताः कृतार्चनाश्चीर्णदेवर्षिपितृतर्पणाः । तत्रैवोषुः कियत्कालं ते
कथालापनिर्वृताः ॥२८॥ दिव्यज्ञानोपपन्नास्ते मुनयः शंसितव्रताः ।
तत्रैकदा पर्यटन्तः समैक्षन्तैकमाश्रमम् ॥ २९ ॥ बलिहोमार्चितं
दिव्यं सुसंमृष्टानुलेपनम् । शुष्यच्छ्यामाकनीवारं वेदिभिश्च विरा-
जितम् ॥ ३० ॥ विशालैरग्निशरणैः स्रुग्भाण्डैराचितं शुभैः ।
दिव्यपुष्पोपहारैश्च सर्वतोऽभिविराजितम् ॥ ३१ ॥ शरण्यं सर्व-
भूतानां ब्रह्मघोषनिनादितम् । दिव्यमाश्रयणीयं तमाश्रमं भ्रम-
नाशनम् ॥ ३२ ॥ प्रविशन्तः परं प्रीताः सर्व एव महर्षयः ।
ज्ञानोपदेशलाभाय पर्याप्तं मेनिरे स्थलम् ॥ ३३ ॥ तदैवोपस्थितं
तत्र याज्ञवल्क्यं महामुनिम् । सूर्यतेजःप्रतीकाशं सर्वशास्त्रविशार-
दम् ॥ ३४ ॥ धर्मधर्माङ्गतत्त्वज्ञं वेदवेदाङ्गपारगम् । कर्मज्ञानोपास-
नाद्यर्थसूक्ष्मतत्त्वावमर्शिनम् ॥ ३५ ॥ जितेन्द्रियं योगपरं मुनिवृन्द-
निषेवितम् । यदृच्छया पर्यटन्तं दृष्ट्वा मुमुदिरे भृशम् ॥ ३६ ॥

अथातिपूताः सुप्रीता मुनयो दिव्यदृष्टयः । भक्त्या प्रणामान् कुर्व्वाणाः समन्तादुपतस्थिरे ॥ ३७ ॥ चक्रिरे तस्य सत्कारं विधिनाऽऽसनसंस्थितम् । उपाजह्रुश्च सलिलं पुष्पमूलफलं शुचि ॥ ३८ ॥ गृहीतार्घ्यं ततः प्रीतं तं मुनिं ब्रह्मवादिनम् । विनयावनताः सर्वे सादरश्चेत्थमूचिरे ॥३९॥ त्वद्दर्शनेन पूताः स्मः कृतकृत्या बभूविम । वयमत्र महाभाग! करुणावरुणालय! ॥४०॥ वयं सर्वेऽधुना तात! प्रपन्नास्त्वां महामुने!। शाधि ज्ञानप्रदानेन भूयस्त्वं ज्ञानभास्करः ॥ ४१ ॥ इति ब्रुवत्सु सर्वेषु याज्ञवल्क्यो महामतिः । अतिगम्भीरया वाचा स्मयमान उवाच ह ॥ ४२ ॥ साधु साधु महाभागाः! प्रीतोऽस्मि विनयेन वः । ज्ञानतत्त्वं परं पुम्भिः शीलेनैवात्र लभ्यते ॥४३॥ शीलं हि परमा विद्या शीलमेव परं तपः । नैव शीलात्परं किञ्चित् तस्माच्छीलं सदाश्रयेत् ॥ ४४ ॥ लोकोपकारकर्त्तॄणि चरितानि भवादृशाम् । तदहं वः प्रवक्ष्यामि यत्प्रष्टव्यं तदुच्यताम् ॥ ४५ ॥ तच्छ्रुत्वा मुनयः प्रीता मिथः सर्वे परामृशन् । पृच्छेत्सर्वहितं किञ्चित्कस्तादृग्बुद्धिमानिति ॥ ४६ ॥ एवं विचारयन्तस्ते निश्चित्य जैमिनिं मुनिम् । प्रार्थयन्त प्रश्रयेण भक्त्या परमया युताः ॥ ४७ ॥ भगवन्! सर्वधर्मज्ञ! त्वमस्मासु मतोऽधिकः । त्वमेक एव जानासि कर्मणो गहनां गतिम् ॥ ४८ ॥ तस्माद्वृतोऽसि भो ब्रह्मन्! तत्त्वं धर्मस्य पृच्छ्यताम् । बहुशाखस्य धर्मस्य दुर्गमत्वं विदुर्बुधाः ॥ ४९ ॥ अतो धर्मश्च धर्माज्ञान्यजानन्तोऽथ मोहिताः । वेदतत्त्वार्थविज्ञानहीनत्वाल्लक्ष्यविच्युताः ॥ ५० ॥ विवदन्ते नरा यत्र यत्र सन्दिहते सदा । तमेवोद्दिश्य विषयं जिज्ञासा क्रियतामिह ॥ ५१ ॥ विविधैनैव तापेन परितप्ताः शरीरिणः । येन ज्ञानेन कल्याणमाप्नुयुस्तद्विचार्यताम् ॥५२॥ एतन्निशम्य सत्कृत्य तान्मुनीनथ जैमिनिः । मुनिराजं याज्ञवल्क्यं सत्कुर्व्वन्निदमब्रवीत् ॥ ५३ ॥

जैमिनिरुवाच ।

अहो पुण्यमहो भाग्यं सफलश्चाऽद्य नस्तपः । जातमेवं विधे क्षेत्रे भवतो दर्शनं यतः ॥ ५४ ॥ नूनमेषा भगवतः सर्वान्तर्या-

मिणो दया। यदस्माभिरियं प्राप्ता भवतः पुण्यसङ्गतिः ॥ ५५ ॥ अद्य ज्ञास्यामहे तत्त्वं गूढं वेदोपपादितम्। सारञ्च सर्वशास्त्राणां त्वन्मुखाम्भोजनिस्सृतम् ॥ ५६ ॥ तद्ब्रूहि भगवन् पूर्वमेतज्जिज्ञासितं हि नः। को भावः तस्य भेदास्तु कियन्तः परिकीर्तिताः ॥ ५७ ॥ का श्रद्धा कीदृशी चेयं भावशोधनकारिणी। कियन्त एव वा तस्या भेदाः ख्याता दयानिधे!॥ ५८॥ त्वदुक्तश्रवणोत्पन्नश्रद्धावृद्ध्या यथा वयम्। विशुद्धभावाः संसारं सन्तरेम तथा कुरु ॥५९॥ अधिगन्तुञ्च भगवद्दिव्यभक्त्यधिकारिताम्। शक्नुमो ब्रह्मनिष्णात! ब्रूहि सर्वं यथोचितम् ॥ ६० ॥ तदाकर्ण्य क्षणं ध्यात्वा याज्ञवल्क्योऽनुमोद्य तत्। कृपया परयाविष्टः प्रवक्तुमुपचक्रमे ॥ ६१ ॥

याज्ञवल्क्य उवाच।

भाव एवाऽत्र सूक्ष्मातिसूक्ष्मतत्त्वं निगद्यते। भावात्सूक्ष्मतरं किञ्चित्तत्त्वं न परिलक्ष्यते ॥ ६२ ॥ भावातीतमपि ब्रह्म ज्ञायते योगिभिः सदा। साहाय्येनैव भावस्य प्रथमं तत्त्ववेदिभिः ॥६३॥ ब्रह्मसाक्षात्कृतौ भावमन्तिमालम्बनं विदुः। सारूप्यावस्थितौ वृत्तेः सदसद्भावभेदतः ॥ ६४ ॥ उत्पद्येते तु भावेन पुण्यपापे उभे अपि। सूक्ष्मावस्था तु भावस्य त्रैविध्यमवलम्बते ॥ ६५ ॥ आध्यात्मिकाऽधिदैवाऽधिभौतिकानीति शास्त्रतः। ज्ञानिना भक्तराजेन तत्त्रयस्यावलम्बतः ॥ ६६ ॥ ब्रह्मेश्वरविराड्रूपैर्भगवान् दृश्यते क्रमात्। ब्रह्माण्डेषु च सर्वत्र ज्ञानिनस्तत्त्वदर्शिनः ॥६७॥ भावांस्त्रीन्सततं सम्यग्वीक्षन्ते सर्ववस्तुषु। भावो हि स्थूलावस्थायां सदसद्रूपमास्थितः ॥ ६८ ॥ स्वर्गञ्च नरकञ्चैव प्रापयत्यत्र मानवान्। श्रद्धाया जनको भाव आत्मोन्मुखकृताविह ॥ ६९ ॥ अन्तःकरणवृत्तेश्च श्रद्धैका मूलकारणम्। त्रिविधा भवति श्रद्धा देहिप्रकृतिभेदतः ॥ ७० ॥ सात्त्विकी राजसी चैव तामसीति बुभुत्सवः!। तासान्तु लक्षणं विप्राः शृणुध्वं भक्तिभावतः ॥७१॥ श्रद्धा सा सात्त्विकी ज्ञेया विशुद्धज्ञानमूलिका। प्रवृत्तिमू-

लिका चैव जिज्ञासामूलिकाऽपरा । विचारहीनसंस्कारमूलिका त्वन्तिमा मता ॥ ७२ ॥

इति श्रीसन्न्यासगीतायां महर्षिसमागमो नाम प्रथमोऽध्यायः ॥

द्वितीयोऽध्यायः ।

जैमिनिरुवाच ।

सर्वशास्त्रार्थतत्त्वज्ञ ! धर्माङ्गज्ञानभास्कर ! त्वत्समो वेदवेदाङ्गनिष्णातो नेतरो जनः ॥१॥ अतस्त्वां धर्मगं धर्मं पृच्छामो भक्तितो वयम् । ज्ञेयं स्फुटं सर्वमुक्त्वा जिज्ञासूननुकम्पय ॥ २ ॥ दुर्ज्ञेयं दुर्गमञ्चापि धर्मतत्त्वं नृणामिह । बहुशाखश्च वेदोऽयं दुर्बोध इति कीर्त्यते ॥ ३ ॥ सन्ति नाना पुराणानि स्मृतयो दर्शनानि च । व्यञ्जयन्ति च भिन्नानि स्वमतानि पृथक् पृथक् ॥ ४ ॥ आचार्या बहवस्तेषां मतञ्चाऽपि विभिद्यते । तत एव वयं सर्वे तत्त्वं ज्ञातुं न शक्नुमः ॥ ५ ॥ भगवान् दर्शितो दैवाद्विधात्रा ज्ञानसागरः । अतस्त्वां परिपृच्छामः शाधि नः शरणागतान् ॥ ६ ॥ ब्रूहि साङ्गं धर्मरूपं सरहस्यं सलक्षणम् । कर्मज्ञानोपासनानां तत्त्वञ्चाऽपि पृथक् पृथक् ॥ ७ ॥ निवृत्तिधर्म्मरूपस्य सन्न्यासस्य च तत्त्वतः । प्रशंसार्हस्य तत्त्वज्ञ निर्णयं वक्तुमर्हसि ॥ ८ ॥ अनुकम्पासमुद्रोऽसि विश्रुतो जगतीतले । तथोपदिश्यतां ब्रह्मन् कृपया परयान्वितः ॥९॥ यथा श्रुतौ दर्शनेषु पुराणेषु स्मृतिष्वपि । यद्वेद्यं वास्तवं वस्तु विज्ञातं स्यादशेषतः ॥१०॥ कृतार्थयास्मज्जननं पूरयस्व मनोरथान् । नृणां निःश्रेयसायैव दर्शनं स्याद्भवादृशाम् ॥ ११ ॥ जैमिनेर्मुनिवर्यस्य वचसा मुदितो भृशम् । याज्ञवल्क्यो महातेजाः प्रहसन्निदमब्रवीत् ॥ १२ ॥

याज्ञवल्क्य उवाच ।

प्रीतोऽस्मि मुनिशार्दूल ! ज्ञातं युष्मत्समीप्सितम् । नूनं विश्वहितायैव प्रश्नोऽयं मुनिसत्तम ॥ १३ ॥ यावत्कालं प्रवत्स्यामि तीर्थेऽस्मिन् व्रतमास्थितः । तावद्वक्ष्ये यथाकालं तत्त्वं वेदादिनिश्चितम् ॥ १४ ॥ यथाधिकारं सर्वाणि शास्त्रतत्त्वान्यहं क्रमात् ।

आवयन्नपनेष्यामि युष्माकं सर्वसंशयान् ॥ १५ ॥ यच्चाऽहमभिधास्यामि तदग्रे ख्यातिमेष्यति । नाम्ना सन्न्यासगीतेति सारभूता श्रुतेः क्षितौ ॥ १६ ॥ पठनाच्छ्रवणाद्यस्या जिज्ञासुश्छिन्नसंशयः । ईशिष्यते मुक्तिपदप्राप्तये नाऽत्र संशयः ॥ १७ ॥ अन्येऽपि यदि सन्देहा भवेयुर्मनसि स्थिताः । तदाऽऽख्येयास्तेऽपि सर्वे निर्विशङ्कं ममाग्रतः ॥ १८ ॥

जैमिनिरुवाच ।

भगवन् ! सर्वधर्मज्ञ ! ब्रूहि धर्मस्य लक्षणम् । के हि साधारणा धर्मा विशिष्टाः के च कीर्तिताः ॥१९॥ कियन्ति धर्मस्याङ्गानि विस्तरेण वदस्व नः । यथा नराः परं श्रेय इह च प्रेत्य चाप्नुयुः ॥२०॥

याज्ञवल्क्य उवाच ।

यतोऽभ्युदयमुत्कृष्टमैहलौकिकमाप्नुयुः । हितश्चाऽमुष्मिकं निःश्रेयसं धर्मः स कीर्तितः ॥ २१ ॥ श्रुतिस्मृत्युदितो धर्म्मस्त्वधर्मस्तद्विपर्ययः । यतः स्वर्गश्च मोक्षश्च स धर्म्मो विदुषां मतः ॥ २२ ॥ धर्मात्प्रवर्द्धते सत्वं पुरुषार्थप्रवर्द्धनम् । जगद्धारणहेतुत्वाद्धर्मत्वं तस्य चेष्यते ॥ २३ ॥ प्रकाशकत्वात्सत्त्वस्य ज्ञानहेतुत्वमीर्य्यते । लघुत्वादूर्ध्वनेतृत्वं सत्त्वाद्धर्मो हि निर्बभौ ॥२४॥ स्वतः सत्वाभिवृद्धिर्यैर्मनोवाक्कायकर्मभिः । तानि सर्वाणि कर्माणि धर्म इत्येष निर्णयः ॥ २५ ॥ धर्म्याचाररतः सत्त्वं वर्द्धयन् परमोन्नतिम् । ऐहिकीमामुष्मिकीं च प्राप्य मोक्षं ततोऽश्नुते ॥२६॥ धर्म्मं यो बाधते धर्मः कुधर्म्मः स हि वस्तुतः । अविरोधी तु यो धर्म्मः स धर्मो मुनिपुङ्गवाः ! ॥ २७ ॥ उक्तः सामान्यधर्मोऽयं विशिष्टस्त्वतिरिच्यते । अधिकारिविभेदेन स ह्यनेकविधः स्मृतः ॥ २८ ॥ सधवाविधवादीनां स्त्रीणां भेदस्य दर्शनात् । प्रत्येकं भिद्यते धर्मस्तथा पुंस्वपि सर्वथा ॥ २९ ॥ मूर्खपण्डितसंन्यस्तगृहस्थादिविभेदतः । सर्वेषामेव प्रत्येकं धर्माः प्रोक्ताः पृथक् पृथक् ॥ ३० ॥ सर्वत्र व्यापकादस्मात् सर्वजीवहितैषिणः । धर्मात् सनातनादेव सर्वे धर्म्माः समुत्थिताः ॥ ३१ ॥ सनातने ह्यार्यधर्मे वैदिकाचारपालना । सदाचारसतीधर्माध्यात्मतत्त्वविचारणा

॥ ३२ ॥ वर्णाश्रमाधीनकर्मविभागश्चात्र विद्यते । अस्मादन्योऽनार्यधर्म इत्यस्मच्छास्त्रनिश्चयः ॥ ३३ ॥ यैवं सदाचारवर्णाश्रमधर्मानुगामिनी । सर्वस्वं मनुते वेदं साऽऽर्यजातिरिति स्मृतिः ॥ ३४ ॥ एतद्भिन्नाऽनार्यजातिः सदाचारादिवर्जिता । अन्यदप्येवमेवोह्यं नोच्यते विस्तृतेर्भयात् ॥ ३५ ॥ अङ्गानि त्रीणि धर्मस्य दानं यज्ञस्तपस्तथा । स्कन्धरूपाणि धर्मस्य शाखिनः पावनानि हि ॥ ३६ ॥ दानञ्चापि त्रिधा प्रोक्तं विद्याऽर्थाभयदानतः । तत्रापि गुणभेदेन नवधा दानमीर्यते ॥ ३७ ॥ एवं तपस्त्रिधा ज्ञेयं कायिकं वाचिकं तथा । मानसञ्चाथ गुणतः प्रत्येकं त्रिविधं पुनः ॥ ३८ ॥ यज्ञधर्मविभेदास्तु मुनीनां बहवो मताः । कर्मज्ञानोपासनाख्या भेदा मुख्यास्त्रयः स्मृताः ॥ ३९ ॥ कर्मयज्ञस्य षड् भेदा नित्यं नैमित्तिकं तथा । काम्यमाध्यात्मिकं चैवाऽधिदैवञ्चाऽधिभौतिकम् ॥ ४० ॥ सत्त्वादिगुणयोगेन भेदास्तत्रापि पूर्ववत् । अतोऽष्टादशधा कर्म प्रत्येकं गुणयोगतः ॥ ४१ ॥ तथैवोपासनायज्ञो मुनिभिर्बहुधा मतः । परं मुख्यप्रभेदास्तूपासनापद्धतेरिमे ॥ ४२ ॥ उपास्तिर्ब्रह्मणस्त्वाद्या द्वितीया सगुणस्य च । तृतीया स्मर्यते लीलाविग्रहोपासना बुधैः ॥ ४३ ॥ चतुर्थी पितृदेवर्षिगणानामस्त्युपासना । अन्तिमा क्षुद्रदेवानां प्रेतादीनां विधीयते ॥ ४४ ॥ अन्येऽपि तस्याश्चत्वारो भेदाः साधनपद्धतेः । तत्रादिमो मन्त्रयोगः स्थूलध्यानैकसाधनः ॥४५॥ द्वितीयो हठयोगः स्याज्ज्योतिर्ध्यानैकसाधनः । लययोगस्तृतीयोऽसौ बिन्दुध्यानविधानकः॥४६॥ राजयोगोऽन्तिमस्तत्र ब्रह्मध्यानं विधीयते । भेदा नवानामप्येषां गुणतः सप्तविंशतिः ॥ ४७ ॥ श्रवणं मननञ्चैव निदिध्यासनमेव च । त्रिधैवं ज्ञानयज्ञोऽपि नवधा स्याद् गुणाश्रयात् ॥ ४८ ॥ इत्यन्वशासुर्धर्मस्य मुख्यान् भेदानशेषतः । चतुर्विंशतिसंख्याकान् मुनयस्तत्त्वदर्शिनः ॥ ४९ ॥ एतेषामपि धर्माङ्गभेदानां गुणभेदतः । भेदा द्विसप्ततिर्भूयो भवन्तीति विभाव्यताम् ॥ ५० ॥ एषु जीवहितायैकमप्यङ्गं यद्यनुष्ठितम् । व्यष्टिबुद्ध्या नरैरत्र यज्ञ इत्युच्यते तदा ॥ ५१ ॥ समष्ट्या सर्वजीवानां हिताय यदनुष्ठितम् । एक-

श्चापि तदा तच्च महायज्ञ इतीर्यते ॥ ५२ ॥ सत्त्वेन सेवितं ह्येक-
मप्यङ्गं पूर्णरूपतः । प्रापयत्येकमप्येतन्नरं मुक्तिपदं क्षणात् ॥५३॥
यथा स्फुलिङ्गश्चैकोऽपि विश्वं दहति सेन्धनः । एवं दहत्येकमङ्गमपि
कर्माणि सर्वशः ॥ ५४ ॥ अहिंसाज्ञानयोगादिधर्मोपाङ्गाश्रयेण
ह । जगत्यां बौद्धधर्मोऽपि प्रथितः प्रचलिष्यति ॥ ५५ ॥ तथा
द्वीपान्तरेष्वेवं केतुमालादिषु क्वचित् । वर्षेषु सत्यतास्वार्थत्यागिता
च गुणादरः ॥ ५६ ॥ ज्ञानार्जनस्पृहा नित्यं नियमानाञ्च पालनम् ।
इमाः सर्वा भविष्यन्ति प्रशस्ता धर्मवृत्तयः ॥ ५७ ॥ यासामाल-
म्बनादेव पाश्चात्याः परमोन्नताः । माननीयत्वमेष्यन्ति जगत्यां
सुप्रतिष्ठिताः ॥ ५८ ॥ पितॄणां गुरुवृद्धानां शुश्रूषा राजभक्तता ।
धैर्य्यञ्च ब्रह्मचर्यञ्च क्षात्रधर्मानुरागिता ॥५९॥ इत्यादि कतिचिद्धर्म-
वृत्तिबाहुल्यसेवनात् । प्रख्यास्यति जयप्राणो देशः स्वल्पोऽपि
भूतले ॥ ६० ॥ अत एवान्यदेशीयाः परोत्कर्षासहिष्णवः । अर्चि-
ष्यंति तथाऽप्येनं केतुमालादिवासिनः॥६१॥ तदैव प्रतिपद्यध्वे सम्म-
न्यध्वे क्षणं यदि । ता धर्मवृत्तयोऽप्यार्य्यधर्म्मोपाङ्गानि सन्ति हि
॥६२॥ कानि कस्येति कथ्यन्ते धर्म्मोपाङ्गानि तत्त्वतः । तपसो मानस-
स्याहुः सत्यं वै मुनिसत्तमाः ! ॥ ६३ ॥ तथा कलिप्रधानस्य दानस्य
स्वार्थत्यागिता । पितृपूजोपासनायाः क्षात्रं कर्म तु कर्मणः ॥६४॥
समष्टिरूपेणैतानि देशजात्यर्थकानि चेत् । महायज्ञोपाङ्गभावं
भजन्तीति विभाव्यताम् ॥ ६५ ॥ अवस्थाभेदतश्चैका धर्मस्य
वृत्तिरास्वपि । भवेद्विभिन्नधर्माङ्गोपाङ्गमित्यपि बुध्यताम् ॥ ६६ ॥
मनोवृत्त्या सह स्वार्थत्यागः सम्बध्यते यदा । तपसः खलु जानीहि
तमुपाङ्गं तदा मुने ! ॥ ६७ ॥ त्यागोऽसौ चेत्प्रकाश्येत यशोऽर्थे
दानिना स्वयम् । तदा स्याद्दानधर्मस्योपाङ्गमेव न संशयः ॥ ६८ ॥
एवं विज्ञानवित्कश्चिद्यदि पश्येत् समाहितः । तदा निश्चिनुया-
त्तस्य धर्मस्योत्तमतां क्षणात् ॥ ६९ ॥ भूमौ विभिन्नधर्माणामाचार्याः
सर्वे एव हि । ते सनातनधर्माङ्गसाहाय्यं प्रतिपेदिरे ॥ ७० ॥
धृतिर्दानं क्षमाऽस्तेयं शौचमिंद्रियनिग्रहः । धीर्विद्या सत्यमक्रोधो
धर्मसामान्यवृत्तयः ॥ ७१ ॥ एताः सर्वान्यधर्मेषु सर्वास्त्वखिल-

जातिषु । सर्वमर्त्यसमाजे च व्याप्ताः सन्तीति मन्यताम् ॥ ७२ ॥ अत एवास्य धर्मस्य गरीयस्त्वं सुसिद्ध्यति । सर्वधर्मप्रसविता तत्त्वेषोऽत्र गीयते ॥ ७३ ॥ यं पृथक् धर्मचरणाः पृथक् धर्मफलैषिणः । पृथक् धर्मैः समर्चन्ति तस्मै धर्मात्मने नमः ॥ ७४ ॥

इति श्रीसन्न्यासगीतायां साधारणधर्म्मनिरूपणं नाम द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

जैमिनिरुवाच ।

व्याख्यातं कृपया ब्रह्मन् ! धर्मतत्त्वविदा त्वया । साङ्गं धर्मं समाकर्ण्य सञ्जाताश्छिन्नसंशयाः ॥ १ ॥ अथाख्याहि मुने ! दानधर्मतत्त्वमशेषतः । यस्मिन् ज्ञाते नराः सर्वे लभेरन् परमं हितम् ॥ २ ॥ ऋषीणां तद्वचः श्रुत्वा याज्ञवल्क्यो मुनीश्वरः । कृपया परयाविष्टः प्रहसन्निदमब्रवीत् ॥ ३ ॥

याज्ञवल्क्य उवाच ।

श्रूयतां दानधर्मस्य रहस्यं मुनयोऽधुना । त्रीण्यङ्गानीह धर्मस्य दानं यज्ञस्तपस्तथा ॥ ४ ॥ त्रिष्वप्यंगेषु धर्मस्य दानमेकं विशिष्यते । विशेषतः कलावेतत्प्रधानं हितसाधनम् ॥ ५ ॥ निर्विशेषतया सर्वे यतो दानेऽधिकारिणः । तस्माद्दानं प्रशंसन्ति सर्वशास्त्रविशारदाः ॥ ६ ॥ स्वसम्बन्धमपाकृत्य यदन्यस्मै प्रदीयते । तद्दानमिति सामान्यलक्षणं मुनयो विदुः ॥ ७ ॥ तत्रापि दत्तवस्तुभ्यः सम्बन्धं मानसं स्वतः । सर्वथा क्षपयेद्योऽसौ स वदान्यशिरोमणिः ॥ ८ ॥ अतीव दुष्करन्त्वेतत्कर्म प्रोक्तं मनीषिभिः । यदपाक्रियते चित्तसम्बन्धश्चिरसम्भृतः ॥ ९ ॥ सुसाधितं सर्वमेव दानिना तेन भूतले । सुपात्रे दत्तवस्तुभ्यश्चित्तं यस्य निवर्तते ॥ १० ॥ अन्ये धर्माः कष्टसाध्यास्तपोयज्ञादयः क्षितौ । बहुश्रमेण सिद्ध्यन्ति मनोवाक्कायनिग्रहात् ॥ ११ ॥ सुखसाध्यं दानमेव सर्वधर्मेषु कीर्तितम् । दीयते देयमुत्थाप्य हस्तेनेयान् श्रमस्त्विह ॥ १२ ॥ दानमर्थस्य विधाया अभयस्येति

च द्विजाः ! । इत्येवं त्रिविधं दानं मया पूर्वमुदीरितम् ॥ १३ ॥ भवत्यभयदानं तद् गुरुणा करुणावशात् । संसारभयनाशाय सम्यग् यदुपदिश्यते ॥ १४ ॥ संसारभयसन्त्रस्तजीवानामाविभीषताम् । शक्ताः सद्गुरवस्तत्र भयं मुख्यं व्यपोहितुम् ॥ १५ ॥ यस्मात्सर्वेऽभयं दातुं नैव शक्ताः क्षितौ जनाः । तस्मादनुपयोगित्वाद्दानमेतदुपेक्ष्यते ॥ १६ ॥ विद्यादानञ्चार्थदानमालोच्येते ततोऽधुना । तत्र पूर्वं ब्रह्मदानापरपर्य्यायमुच्यते ॥ १७ ॥ कायेन मनसार्थेन विद्यावृद्धिमिहेच्छता । यद्दानं दीयते सम्यक् ब्रह्मदानं तदीर्य्यते ॥ १८ ॥ स्थापनं पाठशालानां महाविद्यालयस्य च । दुर्लभप्राक्तनानर्घ्यपुस्तकानां प्रकाशनम् ॥ १९ ॥ तथा विरचनं नव्यग्रन्थानामुपयोगिनाम् । दानञ्च पुस्तकादीनां विद्यार्थिभ्योऽथ पाठनम् ॥ २० ॥ एवं लेखनशैलीनां हितबुद्ध्या प्रवर्त्तनम् । ज्ञेयान्येतान्यपि ब्रह्मदानान्तर्भावितानि वै ॥ २१ ॥ हस्त्यश्वरथवस्त्रान्नकन्यारत्नावनीगृहम् । दीयते श्रद्धया यत्र चेतनाचेतनात्मकम् । ॥ २२ ॥ धनैश्वर्यादिकं सर्वं दीयमानमथार्थिने । ऋषिभिः प्रोच्यते सम्यगर्थदानमिति स्फुटम् ॥ २३ ॥ सर्वाण्येतानि दानानि गुणत्रयविभागतः । प्रत्येकं त्रिविधानीह भवन्ति द्विजसत्तमाः ! ॥२४॥ देशकालानुरोधेन पात्रायानुपकारिणे । अनीप्सितयशःसौख्यं दीयते तद्धि सात्त्विकम् ॥ २५ ॥ जनः कीर्तिफलाकाङ्क्षी तथा प्रत्युपकारधीः । यद्ददात्युपकर्त्रे च दानं तद्राजसं स्मृतम् ॥२६॥ सद्देशकालपात्रादिज्ञानसन्मानवर्जितम् । सरोषकष्टं यद्दानं तत्तु तामसमुच्यते ॥२७॥ सात्विकेनैव दानेन मुक्तिः सम्पद्यते द्विजाः ! । राजसेन सुखैश्वर्य्यमिहामुत्र प्रपद्यते ॥ २८ ॥ तामसेनाश्नुते दुःखं कदाचिच्च्यवतेऽप्यधः । तस्माद्देयं विचार्य्यैव दानं सत्त्वगुणोर्जितम् ॥२९॥ क्षुद्रवस्तुप्रदानादिकर्मसामान्यमात्रतः । अहो मुक्तिः कथं सिद्ध्येद् दुर्लभा सा तु गीयते ॥ ३० ॥ इत्येवमनुयुञ्जीत संशयानोऽत्र कोऽपि चेत् । तदैवं बोधनीयोऽसौ शास्त्रतत्त्वविचक्षणैः ॥ ३१ ॥ सम्पद्यते कर्मणैव मुक्तिः स्वाचरितेन वै । सुनिर्णीतमिदं कर्ममीमांसायां यथायथम् ॥ ३२ ॥ कर्मैव दानमप्येतद्विश्व-

स्येत स्फुटं यदि । यथावच्छास्त्रनिर्द्दिष्टरीत्यैवानुष्ठितश्च चेत् ॥३३॥ तत्रापि सत्त्वसंजुष्टं तीव्रश्चापि भवेद्यदि । नूनं सम्प्रापयत्येव नरं मुक्तिं न संशयः ॥ ३४ ॥ मुक्तिदत्वे च धर्मस्य तदङ्गश्चापि मुक्तिदम् । यस्यांशिनो हि यो धर्मः स तदंशेऽपि लभ्यते ॥ ३५ ॥ यथाग्नेर्दाहकत्वश्चेद्गुणो लोकेऽवलोक्यते । तदा तस्य स्फुलिङ्गेऽपि प्रत्यासन्नः स वै गुणः ॥ ३६ ॥ सद्देशकालपात्रादिसाहाय्यश्चेत्समश्नुते । दहत्येकः स्फुलिङ्गोऽपि वनमार्द्रमपि क्षणात् ॥ ३७ ॥ एवं धर्माङ्गमप्येकं दानश्चेद्विधिना भवेत् । तदा तेनाप्यश्नुवीत नरो मुक्तिं न संशयः ॥ ३८ ॥ विज्ञेयं तत्त्वमत्रेदं सर्वशास्त्रार्थनिश्चितम् । सुगुप्तं सारभूतं च वक्ष्यमाणं मुनीश्वराः ! ॥ ३९ ॥ यावच्चित्तं मनुष्याणां विषयासक्तिमद्भवेत् । तावत्तद्वृत्तयश्चान्तःकरणं क्षोभयन्त्यलम् ॥ ४० ॥ यदा स्याद्विषयासक्तिर्विलीना सुतरामिह । विलीयन्ते तदाप्येषां वृत्तयश्चापि सर्वशः ॥ ४१ ॥ क्षीयते वृत्तिनाशे च चांचल्यं मनसः क्षणात् । नष्टे च चापले चित्तं धारणायां प्रवर्तते ॥ ४२ ॥ तदेतदेव भगवान् योगशास्त्रे सदाशिवः । आम्नातवाँ "श्चित्तवृत्तेर्निरोधो योग" इत्यथ ॥४३॥ आज्ञापयच्च मुदितः परमेण समाधिना । "द्रष्टुः स्वरूपेऽवस्थानं तदा" स्यादिति चाग्रतः ॥ ४४ ॥ नूनमेतेन संसिद्धं यत्पुमान् शंसितव्रतः । विषयात्मकवस्तुभ्यश्चित्तवृत्तीर्निवारयन् ॥ ४५ ॥ दद्याद्विषयभूतानि तानि वस्तूनि सर्वथा । तदा निश्चापलं चेतः स्थिरतां लभते पराम् ॥ ४६ ॥ स्थिरेऽन्तःकरणे जाते स्यात्तच्चैतन्यदर्शनम् । तथात्वे च नरो मुक्तिं विन्दत्येव सदा स्थिराम् ॥ ४७ ॥ एवं चैकेनापि दानधर्मेणासाध्यते नरैः । सुदुर्लभाऽपि सा मुक्तिः क्षुद्रास्ताः सिद्धयः किमु ॥ ४८ ॥ यद्येकं पणमप्यन्नमल्पं सात्त्विकभावतः । प्रीतो ददाति पात्राय मुक्तिस्तेनाऽपि लभ्यते ॥ ४९ ॥ यदि चेद्रजसाविष्टो वितरेद्विपुलं धनम् । ऐहिकामुष्मिकं सौख्यमश्नुते मुक्तिमत्र नो ॥ ५० ॥ शुद्धे भावेऽल्पिष्ठदानमप्यनन्तफलं भवेत् । भावाशुद्धौ महद्दानमपि नालं फलाय तत् ॥ ५१ ॥ उक्तं पुरस्ताद्यो विप्रास्तामसेनैति दुर्गतिम् ।

तत्राप्येतद्विजानीत तत्त्वमुक्तं यदग्रतः ॥ ५२ ॥ इहामुत्र च संसिद्धिं दातुं दानं यथेश्वरम् । तथैतद्दुर्गतिश्चापि नरं प्रापयितुं क्षमम् ॥ ५३ ॥ दत्तं हि तामसं दानमपात्रे यत्र पापिनि । उद्युक्ते स विशेषेण तीव्रे दुष्कृतकर्मणि ॥ ५४ ॥ दातुश्च फलसम्बन्धः पारम्पर्य्यक्रमागतः । ततोऽसौ तामसो दाता स्यात्तत्पापफलांशभाक् ॥ ५५ ॥ अथ तस्मिन् पापफले प्रवृद्धे तु शनैः शनैः । अवश्यं दुर्गतिं याति कैव वात्र विचारणा ॥ ५६ ॥ सिषाधयिषुभिस्तस्माद्दानधर्मं नरैरिह । सत्त्वादिगुणमाहात्म्यं विस्मर्तव्यं न कर्हिचित् ॥ ५७ ॥ विद्यालयस्थापनादिब्रह्मदानात्मकान्यथ । धनरत्नाद्यर्थदानरूपाण्युत्सर्जनानि च ॥ ५८ ॥ देशकालप्रयुक्तानि योग्यपात्रार्पितानि चेत् । संसृज्यन्ते सत्फलेन नान्यथा तु कदाचन ॥ ५९ ॥ तस्मात्सावहिताः सर्वे ! निशामयत साम्प्रतम् । देशकालादिविज्ञानं व्याचष्टेऽहं पृथक् पृथक् ॥ ६० ॥ कस्मिन् देशे हि दातव्यं कुत्रैतद्वस्तु दुर्लभम् । क्व चाधिकफलावाप्तिर्देशे दानेन सिद्ध्यति ॥ ६१ ॥ कुत्र दानेनेश्वराज्ञा विहिता स्याद्विशेषतः । कस्मिंश्च देशे दानेनाऽधिकं जीवहितं भवेत् ॥ ६२ ॥ इत्येवमसकृत्सर्वे चिन्तयेयुर्यदा धिया । तदैवाशु प्रपद्येरन् देशज्ञानं हितप्रदम् ॥ ६३ ॥ एवं कदा हि दातव्यं कदैतद्वस्तु दुर्लभम् । कस्मिन् काले च दानेन लभ्यते विपुलं फलम् ॥ ६४ ॥ कदा दानेनेश्वराज्ञापालनं स्याद्यथार्थतः । कस्मिंश्च काले दानेन बहुजीवहितं तथा ॥ ६५ ॥ इत्थं चिन्तनतो नूनं कालज्ञानमुदेत्यलम् । तथैवावश्यकं पात्रज्ञानञ्चात्र निशम्यताम् ॥ ६६ ॥ वितीर्य कीदृशे दानं भूयिष्ठं फलमाप्यते । पात्राय कीदृशे देयं कस्यैतद्वस्तु दुर्लभम् ॥ ६७ ॥ कस्मै दानेन सौकर्य्यमीशाज्ञापालने भवेत् । कीदृशाय च पात्राय दानं प्राणिहितावहम् ॥ ६८ ॥ इत्येवं यो देशकालपात्रादिज्ञानपूर्वकम् । ददाति दानं लोके स दानसिद्धिं प्रपद्यते ॥ ६९ ॥ एवं त्रिगुणतत्त्वञ्च शास्त्रोक्तं योऽध्यवस्यति । असावभ्युदयं निःश्रेयसञ्चाप्नोत्यनुत्तमम् ॥ ७० ॥ यदा यदा मनुष्येषु देशज्ञानमुदेष्यति । तदाऽनावश्यकस्थाने न तैर्दानं प्रदा-

स्यते ॥ ७१ ॥ यदैव कालविज्ञानं भविष्यति नरेष्विह । विद्या-
लयाद्यर्थमर्थोऽभावो न स्थास्यति क्षितौ ॥ ७२ ॥ यदा च मानसे
तेषां पात्रज्ञानमुदेष्यति । न भविष्यन्ति वै मूर्खा ब्राह्मणास्तीर्थ-
वासिनः ॥ ७३ ॥ यदि पात्रविचारश्च तेषां स्थास्यति चेतसि ।
न तदानीं ब्राह्मणानां दुर्गतिः समुदेष्यति ॥ ७४ ॥ नोपरंस्यति
वंशोऽपि गुरूणाश्च पुरोधसाम् । विद्याज्ञानतपोभ्यासान्न पतिष्यंति
ते द्विजाः ॥ ७५ ॥ नापि ते भ्रंशयिष्यंति यजमानाँश्च सद्व्रतैः ।
त्रायते हि यतः पात्रं नरके पतनान्नरम् ॥ ७६ ॥ इत्येवं मन्निग-
दितमविचार्यैव चेतसा । दानं यद् दीयते तस्मात्त्वदानं सुतरां
वरम् ॥ ७७ ॥ यतो दत्तेनापि तेन न स्याच्छ्रेयो नृणामिह ।
स्वदेशस्य स्वजातेर्वा समष्टिव्यष्टिरूपतः ॥ ७८ ॥ न चाप्यत्रोन्न-
तिस्तस्य स्वधर्मेऽपि विजृम्भते । तस्माच्छास्त्रोक्तरीत्यैव दद्याद्दानं
समाहितः ॥ ७९ ॥ धरातले यावदत्र यथावद् विधिना नराः ।
नाऽभ्यस्येयुर्वितरितुं तावन्नाऽशा समुन्नतेः ॥ ८० ॥ सर्वेभ्यश्चान्य-
देशेभ्यो भारते हि निरन्तरम् । संख्यातीतं देयवित्तं न च नो
दीयते नरैः ॥ ८१ ॥ यदि तत्तामसेनैव भावेन हि वितीर्यते ।
आश्लिष्यन्ते पुमांसो हि तत एव विपत्तिभिः ॥ ८२ ॥ तत एव
च देशोऽयमधिकं प्रच्यविष्यते । तस्माद्भाव्यं सदा दात्रा देश-
कालादिदर्शिना ॥८३॥ इति वः कथितं सर्वं यत्पृष्टोऽहं मुनीश्वराः ! ।
माहात्म्यं दानधर्मस्य किं भूयः श्रोतुमिच्छथ ॥ ८४ ॥

जैमिनिरुवाच ।

धर्म्माङ्गस्य द्वितीयस्य तपसस्तत्त्वमुत्तमम् । श्रावयित्वा
कुरुष्वास्मान् कृतकृत्यान् कृपानिधे ! ॥ ८५ ॥

याज्ञवल्क्य उवाच ।

कर्म चोपासना ज्ञानं यथैतत्साधनत्रयम् । प्रधानञ्चोत्तमञ्चाहु-
र्धर्माङ्गेष्वखिलेष्वपि ॥ ८६ ॥ एवं तपोऽपि धर्मस्य साधनं मुनयो
विदुः । बहूपयुक्तं लोकेऽस्मिन्नत्यपेक्षितमेव च ॥ ८७ ॥ शरीर-
चित्तयोः सर्वसौख्यं त्यक्त्वा शनैः शनैः । तयोर्निर्द्वन्द्वधर्मित्वा-
पादनं तप उच्यते ॥ ८८ ॥ यथैकत्र दृढः पाशैः पशोर्बद्धस्य सन्त-

तम् । प्रवर्द्धन्तेऽधिकं कामवेगविक्रमशक्तयः ॥ ८९ ॥ एवं कायमनोऽक्षाणां वर्द्धते नितरां बलम् । तपसि स्थापनादेव सुखभोगविवर्जनात् ॥ ९० ॥ श्रूयते या पुराणेषु मुनीनां शक्तिरद्भुता । देवविस्मापिका साऽपि प्राप्ताऽऽसीत् तपसा भुवि ॥ ९१ ॥ लोकोत्तरं हि लोकेऽस्मिन् दिव्यं तेजो महात्मसु । विभाव्यतेऽधुना काले तच्चापि तपसः फलम् ॥९२॥ ब्राह्मक्षात्रविभेदेन तेजो यद् द्विविधं मतम् । तपसा रक्ष्यते तत्र ब्राह्मं दानेन चापरम् ॥ ९३ ॥ पतिप्रीतिकरं ह्येकं शारीरं मानसं तपः । आचरन्ती गतिं साध्वी सुदुष्प्रापां समश्नुते ॥ ९४ ॥ मनोवाक्कायनिर्वर्त्यं पूर्वमुक्तं तपस्त्रिधा । तत्रैकमाचरन्त्येके द्वे वा सर्वाणि वापरे ॥ ९५ ॥ अङ्गस्य यस्य यस्यैव तपःशक्तिः समेधते । बाहुल्येन तदङ्गस्य शक्तिर्भावश्च वर्द्धते ॥ ९६ ॥ यथा वाक्तपसः सिद्ध्या बहुन्यन्यफलान्यपि । प्राप्नुयुर्वा न वा किन्तु वाचः सिद्धिस्तु जायते ॥ ९७ ॥ तपः शारीरिकं देवगुरुप्राज्ञद्विजार्चनात् । सिद्ध्येच्छौचार्जवब्रह्मचर्याहिंसादिसेवनात् ॥ ९८ ॥ अनुद्वेजकसत्येष्टप्रियवाक्यप्रयोगतः । स्वाध्यायाभ्यसनाच्चेह संसिद्ध्येद् वाङ्मयं तपः ॥ ९९ ॥ सिद्ध्येन्मानसमद्वेषाद् ब्रह्मणि प्रणिधानतः । तुष्टिश्रद्धाभावशुद्धिधृतिमौनाऽऽस्तिकत्वतः ॥१००॥

इति श्रीसन्न्यासगीतायां दानतपोधर्मनिरूपणं नाम तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

जैमिनिरुवाच ।

श्रुतौ सर्वविदस्माभिः प्राणिनां हितकारकौ । दानधर्म्मतपोधर्म्मौ विदानीं श्रावयस्व नः ॥ १ ॥ त्रीण्यङ्गानि प्रधानानि यज्ञधर्म्मस्य तत्त्ववित् । कर्मज्ञानोपासनानि गूढं चैतद् रहस्यकम् ॥२॥ यज्ज्ञानादेव वेदस्य स्वरूपज्ञानमुत्तमम् । काण्डत्रयात्मकस्यापि तत्त्वेनैवोदयेदिह ॥ ३ ॥

याज्ञवल्क्य उवाच ।

काण्डत्रये कर्मकाण्डमतीव गहनं स्मृतम् । परमावश्यकं नृणां

वर्त्तते चातिविस्तृतम् ॥ ४ ॥ न हि कर्म विना कोऽपि कुत्रापि स्थातुमर्हति । चराचरे व्याप्तमेतद् ब्रह्मेवेत्यवधार्यताम् ॥ ५ ॥ किन्तु तत्राचरेत्तद्धै यच्छास्त्रविहितं भवेत् । निषिद्धन्तु त्यजेद्दूराद्य इच्छेत् परमं हितम् ॥ ६ ॥ यथाऽस्य साधनानीह स्थूलास्स्थूलतराण्यपि । तथा सूक्ष्मतमा ह्यस्य संस्कारा बलवत्तराः॥ ७ ॥ यावन्ति क्रियमाणानि कर्माणि प्राक्कृतान्यपि । चित्तेषु सूक्ष्मरूपेण विश्राम्यन्ति दृढं नृणाम् ॥ ८ ॥ यथा बीजे वृक्षरूपं लीनं कश्चित्समीक्षितुम् । प्रवर्तितोऽपि केनाऽपि क्षमते न विलोकितुम् ॥ ९ ॥ परं बीजं तदेवाम्बुमृद्योगं लभते यदि । तदा तस्मात् समुद्भूतो वृक्षः सर्वैरपीक्ष्यते ॥ १० ॥ तथा सर्वाणि कर्माणि मनोलीनानि देहिनाम् । अतिसौक्ष्म्यान्न शक्यन्ते स्मर्तुमज्ञैर्नरैः क्वचित् ॥ ११ ॥ शुभाशुभानि तान्येव बलवन्तीह जन्मनि । अन्यजन्मनि वा प्राप्य देशकालानुकूलताम् ॥ १२ ॥ यथायोग्यं यथाशक्ति शुभान्येवाशुभानि वा । अतर्कितान्यपीहाशु फलानि जनयन्ति हि ॥ १३ ॥ देवत्वञ्च नरत्वञ्च जीवास्तिर्यक्त्वमेव वा । कर्मभेदादेव लोके प्रपद्यन्ते पृथक् पृथक् ॥ १४ ॥ स्वर्गं भूमिं दुर्गतिञ्च जड़त्वं ज्ञानितामपि । प्राप्नुवन्तीह भूतानि कर्मणैवेति मे मतम् ॥१५॥ कर्मक्षेत्रतयैवैतद् भारतं स्तूयते क्षितौ । अतश्चैवात्र वाञ्छन्ति जननं विबुधा अपि ॥ १६ ॥ यच्चार्यजातिरस्त्यत्र महामहिमशालिनी । तत्रापि मूलमस्त्यस्या विशिष्टा कर्मपद्धतिः ॥ १७ ॥ गर्भाधानादिसंस्कारैरियं ध्वस्तमनोमला । आजन्मानुष्ठितैः सद्भिः शुद्धा राजति कर्मभिः ॥१८॥ लोके तत्तत् पुण्यकर्म यद्यत्स्यात्सत्त्ववर्द्धकम् । तमोविवर्द्धकं यद्यत्प्रोच्यते पापकर्म तत् ॥ १९ ॥ एतयोस्तारतम्येन वैलक्षण्यं मिथो गताः । लोकाः शास्त्रेषु विख्याता अध ऊर्ध्वं चतुर्दश ॥ २० ॥ विचित्रेयं कर्मशक्तिर्ययैकः सात्त्विकाश्रितः। नीयते हि पदं मुक्तेर्नरः संशुद्धमानसः ॥ २१ ॥ पापकर्माश्रयेणैव तमसा सुजड़ीकृतः । क्रमशश्चानयैवाशु पात्यते दुर्गतौ परः ॥२२॥ अतोऽवश्यं मानवेन श्रेयः परमामिच्छता । अवधेयं प्रयत्नेन सत्कर्माचरणे सदा॥२३॥ प्राचुर्य्यं कर्मणामेव ज्ञानादि-

भ्योऽत्र विष्टपे। विस्तृतिः कर्मकाण्डस्य वेदे तस्मात्समीक्ष्यते ॥२४॥ निरूपितास्त्रयो भेदाः शास्त्रेष्वेतस्य कर्मणः। नित्यं नैमित्तिकं काम्यमिति वक्ष्यथ लक्षणम् ॥ २५ ॥ विशिष्टं यदनुष्ठाने पुण्यं नाप्नोति मानवः। तन्नित्यं प्रत्यवायश्चाकरणे यस्य निश्चितः॥२६॥ यथा सन्ध्योपासनादावकृते प्रत्यवायिता। कृतेऽपि नियमेनैव पुण्यं किञ्चिन्न लभ्यते ॥ २७ ॥ कृते यस्मिन् फलप्राप्तिरकृते तु न पातकम्। एतन्नैमित्तिकं प्रोक्तं यथा तीर्थादिसेवनम् ॥ २८ ॥ काम्यं तत् कार्यसिद्ध्यर्थं सकामो विदधाति यत्। यथाऽनपत्यः पुत्रेष्टियागाद्यत्रानुतिष्ठति ॥ २९ ॥ एतेऽपि च त्रयो भेदाः कथिता मुनिभिः पुरा। आध्यात्मिकं तथा चाऽधिदैविकञ्चाऽधिभौतिकम् ॥ ३० ॥ क्रियते यत्स्वधर्मस्य स्वदेशस्योपकारकम्। ज्ञानानुशीलनं यत्र ज्ञेयमाध्यात्मिकं हि तत् ॥ ३१ ॥ देवानां कार्यमुद्दिश्य यत्र यागादिकं भवेत्। तादृशं सकलं कर्म विज्ञेयं ह्याधिदैविकम् ॥ ३२ ॥ तच्चाधिभौतिकं कर्म सर्वभूतार्थमेव यत्। दीयतेऽत्रातिथिभ्योऽन्नं भोज्यन्ते ब्राह्मणादयः ॥ ३३ ॥ निष्कामतः कामतश्च सर्वाण्येतान्यपि द्विधा। तदेवं कर्ममाहात्म्यं गहनञ्चातिविस्तृतम् ॥ ३४ ॥ नियतं सङ्गरहितमरागद्वेषतः कृतम्। अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥ ३५ ॥ यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः। क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥३६॥ अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्। मोहादारभ्यते कर्म यत्तत्तामसमुच्यते॥३७॥ उभे सकामनिष्कामे कर्म्मणी प्रबले मते। प्रवृत्तिमूलकं त्वाद्यं निवृत्तिमूलकं परम् ॥३८॥ प्रवृत्तिमूलकत्वेऽपि प्रथमस्य विशेषतः। प्रदातृत्वं ह्यभ्युदयस्याऽपवर्गस्य चोच्यते ॥३९॥ लोकं पितॄणां स्वर्गं च तद्दत्ते क्रमशः कृतम्। तथेन्द्रादिपदं श्रेष्ठं भोगाँश्चैवोद्र्ध्वलोकगान् ॥ ४० ॥ अत एव श्रुतावास्तेऽधिकं माहात्म्यमस्य हि। एतस्यैव बलाज्जीवा यान्ति देवर्षिपितृताम् ॥४१॥ अवतारा भगवतोऽप्येवं कर्म्माश्रिता मताः। निवृत्तिधर्म्ममूलस्य निष्कामस्य तु कर्म्मणः ॥ ४२ ॥ विलक्षणा गतिस्तात! कथिता शास्त्रविस्तरे। गतिस्तेनैव सहजा जीवन्मुक्तिश्च लभ्यते ॥ ४३ ॥

कर्म्मणो हि प्रसादेन जीवन्मुक्ता नरा अपि । धृत्वेशस्य रताः कार्य्ये कुलालचक्रवद्वपुः ॥ ४४ ॥ संकल्पस्य विकल्पस्य जात्यायुर्भोगसंहतेः । प्रकृते रूपतस्तेषु कर्म्मशक्तिः स्थिता ध्रुवम् ॥ ४५ ॥ अतः सर्वप्रधानेयं दुर्ज्ञेयाऽभ्यधिकं मता । कर्म्मणां गतिर्विचारः सर्वज्ञाः सम्मता भुवि ॥ ४६ ॥ कर्म्मण्युपास्तौ ज्ञाने च ह्यङ्गोपाङ्गान्विताः सदा । धर्म्माः सर्वेऽन्तर्भवन्ति ततो वेदस्त्रिकाण्डकः ॥ ४७ ॥ उपासनेशसान्निध्यप्राप्तेर्हेतुरिहोच्यते । ब्रह्मस्वरूपज्ञानस्योपायानां वर्णनं खलु ॥ ४८ ॥ ज्ञानकाण्डे महाभागाः स्फुटमस्तीह विस्तरात् । सच्चिदानन्दरूपस्य ब्रह्मणः समुपासना ॥ ४९ ॥ तथा सगुणमूर्त्तेश्च तस्यैव हि महर्षिषः । लीलाविग्रहरूपस्य तस्यैव परमेशितुः ॥ ५० ॥ देवानाञ्च ऋषीणाञ्च पितॄणामपि सर्वथा । तत्प्रत्यक्षविभूतीनामुपास्तिर्मुनिपुङ्गवाः ! ॥५१॥ वर्णितोपासनाकाण्डेऽस्तीत्येतदवधार्य्यताम् । निम्नाधिकारिणां प्रोक्ता निम्नाऽनेका ह्युपासनाः ॥ ५२ ॥ तामसीनाञ्च शक्तीनां तस्यैव परमात्मनः । शरीरं योगमार्गो वै भक्तिः स्यात् प्राणरूपिका ॥५३॥ आहुस्तूपासनाकाण्डस्येदृक्तत्त्वमृषीश्वराः । योगः क्रियामूलकःस्याद्भक्तिस्तु भावमूलिका ॥ ५४ ॥ मन्त्रो हठो लयो राजयोगश्चेतिचतुर्विधाः । योगा भक्तिस्त्रिधा प्रोक्ता गौणी रागात्मिका परा ॥ ५५ ॥ निर्गुणोपासना याऽस्ति ब्रह्मणो वेदमूर्द्धसु । सर्वासूपनिषत्स्वास्तेऽधिकारो न्यासिनामिह ॥ ५६ ॥ वेदस्य ज्ञानकाण्डस्तु सप्तधा परिकीर्तितः । सप्तानां ज्ञानभूमीनामानुकूल्येन साधवः ! ॥ ५७ ॥ सर्वे एव यतन्तेऽत्र स्वाऽधिकारानुसारतः । सच्चिदानन्दरूपस्य ब्रह्मणो रूपवर्णने ॥ ५८ ॥ सर्वेषां कथनं वेदानुकूल्यमिह विन्दते । तत्त्वातीतं पदं तद्वदवाङ्मनसगोचरम् ॥ ५९ ॥ सर्वे ज्ञातुं यतन्ते वै साहाय्याच्छन्दभावयोः । ज्ञानस्य साधनानान्तु सप्तानामाश्रयाः स्वतः ॥ ६० ॥ सप्त दर्शनशास्त्राणि कथ्यन्तेऽत्र बुभुत्सवः ! । शास्त्राणामन्तिमं प्रोक्तं शास्त्रं वेदान्तमुत्तमम् ॥ ६१ ॥ अत एवाऽधिकारोऽस्ति केवलं न्यासिनामिह । सर्वभूतेषु येनैकं भावमव्ययमीक्षते ॥ ६२ ॥ अविभक्तं

विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् । पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ॥ ६३ ॥ वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् । यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ॥६४॥ अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥ ६५ ॥

इति श्रीसन्न्यासगीतायां कर्म्मोपासनाज्ञाननिरूपणं नाम चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

ऋषय ऊचुः ।

धर्म्मज्ञ! गतिवेत्ताऽसि त्वमेव कालकर्म्मणोः । भवतः कृपया धर्म्मरहस्यं श्रुतमुज्ज्वलम् ॥ १ ॥ अङ्गोपाङ्गयुतं गूढं श्रुतिमूलमिदं हितम् । भवतोऽन्तिमसिद्धान्ताज्ज्ञातमस्माभिरानतैः ॥ २ ॥ निवृत्तिमार्गनिष्कामकर्म्मणोः सर्वथा क्षमः । सन्न्यासधर्मं एवाऽस्ति सर्व्वश्रेष्ठोऽत्र भूतले ॥ ३ ॥ सन्न्यासाश्रम उक्ताँस्तान् धर्म्मांस्तत्र महामते ! । विहितानि च कर्म्माणि श्रावयाऽस्मानतोऽधुना ॥ ४ ॥ सन्न्यासिनां भवान् श्रेष्ठो जगतां गुरुरेव च । उपदेष्टा भवेत् कोऽन्यस्त्वत्तोऽन्यो धर्म्मशिक्षणे ॥ ५ ॥

याज्ञवल्क्य उवाच ।

सन्न्यासधर्म्मनिर्वाहो दुर्गमः परिकीर्तितः । अत एव त्रिकालज्ञा ऋषयो मुनयस्तथा ॥ ६ ॥ सन्न्यासग्रहणे सर्वे सङ्कोचं चक्रिरे सदा । अतो वर्णगुरुर्विप्रः सन्न्यासी तद्गुरुः स्मृतः ॥ ७ ॥ विप्राणामेव तत्राऽस्ति सन्न्यासेऽधिकृतिः शुभा । अवस्थायां चतुर्थ्यां या सततं श्रुतिसम्मता ॥ ८ ॥ भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः । बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥ ९ ॥ ब्राह्मणेषु तु विद्वांसो विद्वत्सु कृतबुद्धयः । कृतबुद्धिषु कर्त्तारः कर्त्तृषु ब्रह्मवेदिनः ॥ १० ॥ तच्छ्रुत्वा विज्ञवर्य्याणां मुनीनां तत्र तस्थुषां । ऋषीणाञ्च विचारोऽभूत् प्रश्नो नाऽन्येन सम्भवेत् ॥ ११ ॥ शुकं विहाय धर्म्मेऽस्मिन् गहने तूर्द्ध्वरेतसम् ।

जैमिन्याद्यास्तदा सर्वे शुकदेवं महामुनिम् ॥ १२ ॥ ऋषयः प्रार्थयामासुः जिज्ञासा क्रियतामिति । सन्न्यासाश्रमधर्म्माणां त्वं नः प्रतिनिधिर्भव ॥ १३ ॥

शुक उवाच ।

सन्न्यासाश्रमधर्म्माणां कलिकालोपयोगिनाम् । तत्त्वं नो ब्रूहि सर्वज्ञ पितुर्यस्माच्छ्रुतं मया ॥ १४ ॥ अहो दुरत्ययः कालस्तथा कालाऽनुसारिणाम् । धर्म्माणां साधनेनैव सुखं सामान्यदेहिनाम् ॥१५॥ कलौ धर्म्मस्यैकपादो गाम्भीर्योनो भविष्यति । एतदन्यदपि श्रुत्वा भवन्तं प्रार्थयामहे ॥ १६ ॥ कलेर्निवृत्तिधर्मस्याऽप्युच्यतां रूपमीश्वर ! ॥ १७ ॥

याज्ञवल्क्य उवाच ।

महान्तोऽपि च धर्म्मज्ञा अधर्मं कुर्वते मुने ! ॥ कलिस्वभाव एवैष परिहार्य्यो न केनचित् ॥ १८ ॥ तस्मादत्र मनुष्याणां स्वभावात्पापकारिणाम् । निष्कृतिर्न हि विप्रेन्द्र ! सामान्योपायतो भवेत् ॥ १९ ॥ यः कश्चिदपि धर्म्मात्मा यज्ञं दानं करोति च । यः कश्चिदपि धर्म्मात्मा क्रियायोगरतो भवेत् ॥ २० ॥ नरं धर्म्मरतं दृष्ट्वा सर्वेऽसूयां प्रकुर्वते । व्रताचाराः प्रणश्यन्ति ध्यानयज्ञादयस्तथा ॥ २१ ॥ उपद्रवा भविष्यन्ति चाऽधर्म्मस्य प्रवर्त्तनात् । असूयानिरताः सर्व्वे दम्भाचारपरायणाः ॥ २२ ॥ प्रजाश्चाल्पायुषः सर्व्वा भविष्यन्ति कलौ युगे । उत्तमा नीचतां यान्ति नीचाश्चोत्तमतां तथा ॥ २३ ॥ राजानश्चाऽर्थनिरतास्तथा लोभपरायणाः । धर्म्मकञ्चुकसंवीता धर्म्मविध्वंसकारिणः ॥ २४ ॥ किङ्कराश्च भविष्यन्ति शूद्राणाञ्च द्विजातयः । धर्म्मस्त्रियं न गच्छन्ति पतयो जारलक्षणाः ॥ २५ ॥ द्विषन्ति पितरं पुत्रा गुरुं शिष्या द्विषन्ति च । पतिश्च वनिता द्वेष्टि कलौ पापिनि चाऽगते ॥ २६ ॥ वेश्यालावण्यशीलेषु स्पृहां कुर्व्वन्ति योषितः । धर्म्मविघ्ना भविष्यन्ति स्त्रियः स्वपुरुषेषु च ॥ २७ ॥ न व्रतानि चरिष्यन्ति ब्राह्मणा वेदनिन्दकाः । न यक्ष्यन्ति न होष्यन्ति

हेतुवादैर्विनाशिताः ॥ २८ ॥ द्विजाः कुर्व्वन्ति दम्भार्थं पितृयज्ञादिकाः क्रियाः। अपात्रेषु च दानानि कुर्व्वन्ति च तथा नराः ॥२९॥ क्षीरोपायनिमित्तेषु गोषु प्रीतिश्च कुर्व्वते। दानयज्ञजपादीनां विक्रीणते फलं द्विजाः ॥ ३० ॥ प्रतिग्रहं प्रकुर्व्वन्ति चाण्डालाद्यैरपि द्विजाः। न च द्विजातिशुश्रूषां न स्वधर्म्मप्रवर्त्तनम् ॥ ३१ ॥ करिष्यन्ति तदा शूद्राः प्रव्रज्यालिङ्गिनोऽधमाः। ततश्चाऽनुदिनं धर्म्मः सत्यं शौचं क्षमा दया ॥ ३२ ॥ कालेन बलिना प्राज्ञाः! नङ्क्ष्यत्यायुर्बलं स्मृतिः। वित्तमेव कलौ नृणां जन्माचारगुणोदये ॥ ३३ ॥ धर्म्मन्यायव्यवस्थायां कारणं बलमेव हि। दाम्पत्येऽभिरुचिर्हेतुर्मायैव व्यावहारिके ॥ ३४ ॥ स्त्रीत्वे पुँस्त्वे च हि रतिर्विप्रत्वे सूत्र मेव हि। लिङ्गमेवाऽश्रमख्याताव्यन्योन्यापत्तिकारणम् ॥ ३५ ॥ अवृत्त्या न्यायदौर्बल्यं पाडित्ये चापलं वचः। अनाढ्यतैवाऽसाधुत्वे साधुत्वे दम्भ एव तु ॥ ३६ ॥ स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनं। दूरे वार्ययनं तीर्थं लावण्यं केशधारणम् ॥ ३७ ॥ उदरम्भरता स्वार्थः सत्यत्वे धाष्टर्यमेव हि। दाक्ष्यं कुटुम्बभरणं यशोऽर्थे धर्म्मसेवनम् ॥ ३८ ॥ एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमण्डले। ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः ॥ ३९ ॥ प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्मभिः। आच्छिन्नदारद्रविणा यास्यन्ति गिरिकाननम् ॥ ४० ॥ शाकमूलामिषक्षौद्रफलपुष्पादिभोजनाः। अनावृष्ट्या विनंक्ष्यन्ति दुर्भिक्षकरपीडिताः ॥४१॥ प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः। न्यासिनोऽपि भविष्यन्ति दैवसन्दूषिताशयाः ॥४२॥ यदा सन्न्यासिनः सर्व्वे क्षात्रवृत्तिं समाश्रिताः। वैश्यवृत्तिश्च मुनयः! तदैव प्रबलः कलिः ॥४३॥ यदा सन्न्यासिनो भूमौ कुसीदग्रहणे रताः। गृहिवन्मन्दिरक्षेत्रमठनिर्माणतत्पराः ॥४४॥ भविष्यन्ति हि विप्रेन्द्राः! तदैव प्रबलः कलिः। तपोयोगविरागेभ्यः परावृत्य यदा रताः ॥४५॥ कामिनीकाञ्चनेष्वेते तदैव प्रबलः कलिः। ब्रह्मचर्य्यमकृत्वैव वानप्रस्थं विना तथा ॥४६॥ गृहस्था न्यासिनः स्युश्चेत्तदैव प्रबलः कलिः। सर्वे वर्णा भविष्यन्ति यदा सन्न्यासदम्भिनः ॥ ४७ ॥ युष्माभि-

स्तर्हि विज्ञेयस्तदैव प्रबलः कलिः । सन्न्यासलिङ्गमाश्रित्य शूद्राद्या ब्राह्मणैर्यदा ॥ ४८ ॥ कारयिष्यन्त्यङ्घ्रिपूजां तदैव प्रबलः कलिः । सन्न्यासिष्वपि भेदश्चेज्जातेः पङ्क्तेर्भविष्यति ॥ ४९ ॥ सम्प्रदाये तथा पन्थे विभागो बहुशो यदा । सन्न्यासिनाञ्च भविता तदैव प्रबलः कलिः ॥ ५० ॥ सद्गृहस्था दरिद्राः स्युर्धनाढ्या न्यासिनो यदा । सन्न्यासधर्म्मनिरता भिक्षां प्राप्स्यन्ति नैव हि ॥५१॥ छद्म-सन्न्यासिनो ह्येव प्राप्स्यन्त्यादरमुत्तमम् । युष्माभिस्तु परिज्ञेय-स्तदैव प्रबलः कलिः ॥ ५२ ॥ क्षुद्रसिद्ध्या तथौषध्या कपटाचरणेन च । वशीकरणतश्चाऽपि सामुद्रिकविधानतः ॥ ५३ ॥ सन्न्यासिनो भविष्यन्ति यदा मान्या धरातले । वैराग्यज्ञानयोगानां तथा तेष्वादरो न हि ॥ ५४ ॥ विज्ञेयो ज्ञानसम्पन्नास्तदैव प्रबलः कलिः । ज्ञानवृद्धतपोवृद्धपूजा ह्रासत्वमेष्यति ॥ ५५ ॥ आध्यात्मिकतत्व-वैराग्यादरो नैव भविष्यति । यदा न्यासिषु वै धीरास्तदैव प्रबलः कलिः ॥ ५६ ॥ यदा तु वैदिकी दीक्षा दीक्षा पौराणिकी तथा । न स्थास्यति महाभागास्तदैव प्रबलः कलिः ॥ ५७ ॥ यदा तु पुण्य-पापानां परीक्षा वेदसम्भवा । न स्थास्यति महाभागास्तदैव प्रबलः कलिः ॥ ५८ ॥ क्वचिच्छिन्ना क्वचिद्भिन्ना यदा सुरतरङ्गिणी । भविष्यति महाभागास्तदैव प्रबलः कलिः ॥ ५९ ॥ यदा तु म्लेच्छ-जातीया राजानो धनलोलुपाः । भविष्यन्ति महाप्राज्ञास्तदैव प्रबलः कलिः ॥६०॥ यदा स्त्रियोऽतिदुर्दान्ताः कर्कशाः कलहे रताः । गर्हिष्यन्ति च भर्त्तारं तदैव प्रबलः कलिः ॥ ६१ ॥ यदा तु मानवा भूमौ स्त्रीजिताः कामकिङ्कराः । द्विषन्ति गुरुमित्रादीन् तदैव प्रबलः कलिः ॥ ६२ ॥ यदा क्षोणी स्वल्पफला तोयदाः स्तोकवर्षिणः । असम्यक् फलिनो वृक्षास्तदैव प्रबलः कलिः ॥ ६३ ॥ भ्रातरः स्वजनामात्या यदा धनकणेहया । मिथः संप्रहरिष्यन्ति तदैव प्रबलः कलिः ॥ ६४ ॥ प्राकट्यं गूढपानं वा निन्दादण्डविवर्जिते । मद्यमांसादिके स्याचेत् तदैव प्रबलः कलिः ॥ ६५ ॥ गुरुशुश्रूषणे युक्ता रक्ताश्चेशपदाम्बुजे । अनुरक्ताः स्वदारेषु न हि तान् बाधते कलिः ॥ ६६ ॥ श्रृणुतर्षिगणाः! यूयं निर्लिप्तः काल ईरितः । कालो

हि भगवद्रूपस्तत्स्वरूपमिहोच्यते ॥ ६७ ॥ प्रत्येककाले जायन्ते यादृशा जीवराशयः । तेषां समष्टिकर्म्मभ्यस्तादृक् कालः प्रतीयते ॥६८॥ तथाऽपीह महाभागाः ! कालशक्तिर्दुरत्यया । कलिकालप्रभावेण परिवर्तनमेति ह ॥६९॥ वर्णाश्रमाणां धर्म्मो वै तस्मात् सन्न्यासिनामपि । धर्मेषु वैपरीत्यं हि भविष्यति महर्षयः ! ॥ ७० ॥

इति श्री सन्न्यासगीतायां कालधर्म्मनिरूपणं नाम पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

शुक उवाच ।

भगवन् ! वेदविहितं भेदं सन्न्यासिनामिह । सामान्याचरणं तेषां धर्म्मं साधारणं तथा ॥ १ ॥ कृपया श्रावयित्वाऽस्मान्कृतकृत्यान्कुरुष्व ह ॥ २ ॥

याज्ञवल्क्य उवाच ।

यज्ञप्रधानः पुंसो वै धर्म्मोऽत्र परिकीर्तितः । तपसश्चाऽपि प्राधान्यं नारीधर्म्मे विशेषतः ॥ ३ ॥ प्रवृत्ते रोधको ज्ञेयो वर्णधर्म्मो मुनीश्वराः ! आश्रमस्य च धर्म्मो हि निवृत्तेः पोषकः स्मृतः ॥ ४ ॥ ऐश्वर्यस्य तु प्राधान्यं वैश्यधर्म्मे विनिश्चितम् । धर्म्मः सेवाप्रधानो वै शूद्रस्य समुदीरितः ॥ ५ ॥ क्षत्रियस्य च धर्म्मोऽयं क्षात्रतेजःप्रधानकः । विप्रधर्म्मे तु भो विप्राः ! ब्रह्मतेजःप्रधानता ॥ ६ ॥ चतुर्ष्वप्याश्रमेष्वेवाऽधिकारो ब्राह्मणस्य ह । सन्न्यासमन्तरेणाऽत्र क्षत्रियस्य त्रिषु स्मृतः ॥ ७ ॥ द्वयोरेव तु वैश्यस्य गार्हस्थ्यब्रह्मचर्य्ययोः । एकस्मिन्नेव गार्हस्थ्ये शूद्रस्याऽधिकृतिर्मता ॥ ८ ॥ प्रवृत्तिं शास्त्रविहितां ब्रह्मचर्य्ये तु शिक्षते । समाचरति गार्हस्थ्ये तां प्रवृत्तिं पुमान् भुवि ॥ ९ ॥ वानप्रस्थे निवृत्तेस्तु शिक्षा पुंसु प्रजायते । निवृत्तिः पूर्णतां याति सन्न्यासाश्रममेत्य वै ॥ १० ॥ आश्रमाणां चतुर्णां वै प्रमुखो धर्म्म उच्यते । संयमस्तु गृहस्थानां नियमो ब्रह्मचारिणाम् ॥ ११ ॥ वानप्रस्थाश्रमस्थानां तपस्त्यागस्तु न्यासिनाम् । सन्न्यासाश्रमभेदाश्च चत्वार इह ईरिताः

॥ १२ ॥ कुटीचकस्तु प्रथमो द्वितीयस्तु बहूदकः । हंसः परमहंसश्च द्वाविमावन्तिमौ स्मृतौ ॥ १३ ॥ सन्न्यासदीक्षामादाय कामिन्यादीन् विहाय च । कुटीचकः स सन्न्यासी नगरप्रान्तसीमनि ॥ १४ ॥ क्वचिन्मनोरमे स्थाने कुटीं निर्म्माय संवसेत् । योगोपनिषदध्यायैः कुर्य्यादाध्यात्मिकोन्नतिम् ॥ १५ ॥ बहूदकस्तु सन्न्यासी न वसेदधिकं क्वचित् । दिनत्रयं प्रतिस्थानं स्थित्वाऽन्यत्र सुखं व्रजेत् ॥ १६ ॥ तीर्थादिकं परिभ्रम्य यथावत् साधनादिभिः । आत्मोपलब्धौ सततं यतेताऽयं महामनाः ॥ १७ ॥ सन्न्यासी ज्ञानवान् हंसो विधाय भ्रमणं मुदा । संसारे ज्ञानविस्तारं कुर्य्यादेव प्रयत्नतः ॥ १८ ॥ पूज्यः परमहंसः स सन्न्यासी विगतज्वरः । कुर्व्वन्नकुर्व्वन् वा किञ्चिदसौ नारायणः स्मृतः ॥ १९ ॥ कौपीनं गैरिकं वस्त्रं दण्डञ्चाऽपि कमण्डलुं । सततं यत्नतः सम्यक् गृह्णीरन् प्रथमास्त्रयः ॥ २० ॥ अस्मिन् परमहंसस्य नियमो नाऽस्ति कश्चन । ध्रुवं विधिर्निषेधश्च तदिच्छाऽधीनतामितः ॥ २१ ॥ पञ्चधासगुणोपास्तावधिकारी कुटीचकः । सुयोग्यः कीर्त्तितः सम्यग् ज्योतिर्ध्याने बहूदकः ॥ २२ ॥ हंसो विन्दूपासनायामधिकारी निगद्यते । पुण्यः परमहंसोऽसौ ब्रह्मोपास्तौ स्वतः क्षमः ॥ २३ ॥ वस्तुतोऽधिकृतिप्राप्तौ सर्व्वे सन्न्यासिनः सुखं । ब्रह्मोपास्तिं सदा कर्तुमर्हन्तीतरथा न हि ॥ २४ ॥ ऋतुद्वये हि सन्न्यासी क्षौरं कुर्य्यात्कुटीचकः । क्षौरं बहूदकः सम्यक् त्यजेत्स्याच्चु जटाधरः ॥ २५ ॥ हंसः परमहंसश्च चेदिच्छन्तावुभौ तदा । क्षौरं प्रत्ययनं कर्त्तुमर्हतः पूतमानसौ ॥ २६ ॥ दण्डत्रयं धरेदाद्यो द्वौ दण्डौ तु बहूदकः । एकदण्डं तृतीयस्तु चतुर्थो नियमोर्ध्वगः ॥ २७ ॥ आद्यो वारत्रयं स्नानमाचरेत्तु बहूदकः । द्विवारमेकवारन्तु तृतीयोऽनियमोऽपरः ॥ २८ ॥ ऊर्ध्वपुण्ड्रं धरेदाद्यो द्वितीयस्तु त्रिपुण्ड्रकम् । तृतीयः श्रद्धया भस्म चतुर्थोऽनियमः स्वतः ॥ २९ ॥ एकाहारः सदाऽऽद्यस्य वृत्तिर्माधुकरी शुभा । द्वितियस्य ततोऽन्यस्य वृत्तिराजगरी मता ॥ ३० ॥ सत्यं परमहंसस्य करपात्रं सुशोभते । यतो बालायमानोऽसौ बालव-

चेष्टते सदा ॥ ३१ ॥ बहिः पूजा शुभाऽऽद्यस्य द्वितीयस्य हि मानसी । आत्मपूजा तृतीयस्य त्वात्मारामोऽपरः स्वयम् ॥ ३२ ॥ मन्त्रयोगः सदाऽऽद्यस्य द्वितीयस्य हठः स्मृतः । तृतीयस्य लयोऽन्यस्य राजयोगो व्यवस्थितः ॥ ३३ ॥ अनुकूलेऽधिकारे तु सर्व्वे सन्न्यासिनः सदा । सर्व्वं विधातुमर्हन्ति नास्ति कश्चन संशयः ॥ ३४ ॥ आद्यो जपेद्वाचनिकमुपांश्वेव बहूदकः । तृतीयो मानसं सम्यक् प्रणवं ब्रह्मवाचकम् ॥ ३५ ॥ पूज्यः परमहंसोऽयं विबुधेश्वरतां गतः । सर्व्वदाऽनुभवं ह्यन्तः प्रणवस्य करोत्यलम् ॥ ३६ ॥ कुर्य्याद्वाद्यो गुरोः कार्य्यं कुर्य्यात्तत्र बहूदकः । आचार्य्यकार्य्यं शास्त्रोपपत्तिकांशोपदेशनम् ॥ ३७ ॥ आचार्य्यस्य गुरोश्चापि कार्य्यं कुर्य्यात्तृतीयकः । न विधिर्न निषेधश्च चतुर्थस्य कदाचन ॥ ३८ ॥ संत्यजेद्वपुषोऽध्यासमाद्यः स्थूलस्य सर्व्वथा । द्वितीयः खलु सूक्ष्मस्य तृतीयः कारणस्य च ॥ ३९ ॥ सर्व्वथाऽयं पूजनीयो मार्गं विधिनिषेधयोः । अतीतः परमो हंसः प्राप्नोति ब्रह्मरूपताम् ॥ ४० ॥ रक्षेदाद्यः शिखासूत्रे द्वितीयः सूत्रमात्रकम् । शिखा तस्य जटायां हि सम्यक् परिणता भवेत् ॥ ४१ ॥ सूत्रशून्यो भवेद्धंसः स्वेच्छाऽधीनैव तज्जटा । न विधिर्न निषेधो वा चतुर्थस्य विधीयते ॥४२॥ अन्त्योऽग्रिमैस्त्रिभिः पूज्यस्तृतीयस्त्वाद्ययोर्द्वयोः । द्वितीयोऽग्र्येण सम्पूज्यो भक्त्या कल्याणमिच्छता ॥ ४३ ॥ सर्वे संन्यासिनः पूज्या वर्णैराश्रमिभिस्तथा । सन्यासिनमविज्ञातं वचसैव नमेत्सुधीः ॥ ४४ ॥ कांक्षितो हीनवर्णोऽपि सन्यासिवेषभाक् यतः । प्रणामे कायिके सम्यक् दोषोऽत्र विद्यते खलु ॥४५॥ नमस्कारे वाचनिके न दोषोऽस्ति कथंचन । व्रतं त्रयाणामाद्यानां प्रत्येकं तु त्रिवत्सरम् ॥ ४६ ॥ व्रते पूर्णेऽधिकारे च लब्धे गुरुदयाबलात् । आद्यो द्वितीयो भवितुं द्वितीयस्तु तृतीयकः ॥ ४७ ॥ एवं तृतीयश्चरमः शक्नुते योग्यतां गतः । आध्यात्मिकाऽधिकारस्य न काश्चित्पूर्णतां विना ॥ ४८ ॥ प्राप्नुयादुन्नतिं तत्र गुरुदेवः परीक्षकः । प्राणहीनः स्थूलेदहमाद्यस्य दहनं व्रजेत् ॥ ४९ ॥ दहनं क्षेपणं वाऽपि द्वितीयस्याऽनले जले । नद्यां क्षेपस्तृतीयस्य क्षित्य-

न्तर्वा निवेशनम् ॥ ५० ॥ चतुर्थस्य विशेषो न नियमोऽस्त्यत्र कश्चन । सन्न्यासिगुरुदेवस्य सन्निधाने कुटीचकः ॥ ५१ ॥ स्पृष्ट्वैवोपनिषद्ग्रन्थं गृह्णीयाद्भक्तितो व्रतम् । बहूदकस्तु सन्न्यासी गुरुदेवस्य सन्निधौ ॥ ५२ ॥ स्पृष्ट्वा तीर्थजलं सम्यक् गृह्णीत व्रतमुत्तमम् । नारायणस्वरूपं तु स्पृष्ट्वा होमानलं स्वयम् ॥ ५३ ॥ गृह्णीयाद्धंससन्न्यासी व्रतं परमभद्रदम् । परः परमहंसोऽसावतीतद्वैतभावनः ॥ ५४ ॥ आत्मतत्त्वं स्वयं स्मृत्वा गृह्णीयात्परमं व्रतम् । दृष्टाऽनुश्रविकैश्वर्य्यमूर्द्ध्वलोकादिकञ्च यत् ॥ ५५ ॥ कुटीचकस्तु मंत्रेण तत्सर्व्वं साधु सन्त्यजेत् । त्यजेत्तदुक्तमखिलं सङ्कल्पेन बहूदकः ॥ ५६ ॥ हंसो भवेत्सर्व्वथैव तत्तत्संस्कारवर्जितः सन्न्यासी परमो हंसः सर्व्वेषां भक्तिभाजनम् ॥ ५७ ॥ ब्रह्मस्वरूपस्तत्तस्य क्व निषेधः क्व वा विधिः । प्रवृत्तिश्च निवृत्तिश्च द्वौ मार्गावेव तिष्ठतः ॥५८॥ निवृत्तिमेवाश्रयेरन् सर्व्वे सन्न्यासिनः सदा । कलिप्रभावतो नूनं वर्णाश्रमविपर्य्ययात् ॥५९॥ इतरेऽप्याश्रयिष्यन्ते निवृत्तिमार्गमुत्तमम् । अन्तश्चतुर्णामेतेषां प्रवेष्टुं यद्यपि क्षमाः ॥ ६० ॥ नैव ते स्युस्तथाप्येते निवृत्तिमार्गगामिनः । अत एवाऽवधूतेति गोस्वामीति च साध्विति ॥ ६१ ॥ उदासीनेति वैरागीति महापुरुषेति च । एतत्पर्य्यायकैरन्यैरपि शब्दैर्निरन्तरम् ॥ ६२ ॥ प्रकीर्त्त्यन्ते यतस्तेऽत्र साधुमार्गावलम्बिनः । त्यागस्य तपसश्चाऽपि ज्ञानस्य तारतम्यतः ॥ ६३ ॥ सम्माननस्याऽपि तेषां तारतम्यं सुविद्यते । विशेषतस्तारतम्याद्वर्णाधिकारयोरपि ॥६४॥ तारतम्यं भवेत्तेषां निवृत्तिमार्गवर्त्तिनाम् । साधवः स्वोच्चवर्णीयान् कुर्वीरन् नैव दीक्षितान् ॥ ६५ ॥ प्रणामं कायिकं तेषां गृह्णीरंश्च कदापि नो । वर्णानामाश्रमाणाञ्च परमोन्नतिसाधिनी ॥ ६६ ॥ अन्यथा धर्म्ममर्य्यादाऽनादिसिद्धाऽपि नङ्क्ष्यति । उदासीना वा भवन्तु ब्राह्मणेतरवर्णजाः ॥ ६७ ॥ त्यागशीला वा भवन्तु रक्ष्येत नियमो हि तैः । अवश्यं धर्म्ममर्य्यादा पालनीया प्रयत्नतः ॥ ६८ ॥ कार्य्यं देवर्षिपितॄणां तैः सम्मानसुरक्षणम् । यत्नो विधेयः सर्वत्र सर्व्वेषां सर्व्वदा स्वतः ॥ ६९ ॥ भगवन्म-

ह्मिप्रेम्णोः कीर्त्तने च प्रचारणे । कर्म्मण्युपास्तौ भक्तौ च रताना-
मधिकारिणाम् ॥ ७० ॥ जनयेयुर्बुद्धिभेदं न ते ज्ञानाऽभिमा-
निनः । परन्तु तेषां सततमधिकारोऽधिकारिणाम् ॥ ७१ ॥ शक्नो-
ति वर्द्धितुं येन विधेया तत्र सम्मतिः । महर्षयोऽहमधुना निवृत्त्या-
श्रयवर्त्तिनाम् ॥ ७२॥ सन्न्यासिनां शुभकरं साधनं प्रब्रवीमि वः।
निष्कामकर्म्माभ्यसनं कार्य्यं स्वस्वाऽधिकारतः ॥ ७३ ॥ उपासना
यथाशक्ति तैस्तु श्रद्धासमन्वितैः । शक्यतेऽहरहः कर्तुं ज्ञानवृद्धि-
स्तथा ध्रुवम् ॥ ७४ ॥ मोक्षशास्त्रादिपाठेन तद्रूपाचरणं तथा ।
तपोज्ञानविवृद्धानां देवतानाञ्च पूजनम् ॥ ७५ ॥ सम्माननं देव-
मूर्त्तिपीठानां कुर्य्युरेव ते । अनाश्रमी न तिष्ठेत्तु क्षणमेकमपि
द्विजः ॥ ७६ ॥ यतो ह्यनाश्रमी तिष्ठन् पतत्येव न संशयः । अतो
गार्हस्थ्यभावेऽपि वैराग्यं समुपागतः ॥ ७७ ॥ तथा गृहस्थधर्म्मस्य
पालने चाऽक्षमः पुमान् । शास्त्रदृष्टेन विधिना ह्याश्रमान्तरमा-
विशेत् ॥ ७८ ॥ विप्रो वनाश्रमे स्थित्वा तृतीयं भागमायुषः ।
चतुर्थमायुषो भागं सन्न्यासेन नयेत् क्रमात् ॥ ७९ ॥ आश्रमा-
दाश्रमं गत्वा हुतहोमो जितेन्द्रियः । भिक्षाबलिपरिश्रान्तः प्रव्रजन्
प्रेत्य वर्द्धते ॥८०॥ अग्नीनात्मनि संस्थाप्य विप्रः प्रव्रजितो भवेत् ।
योगाभ्यासरतः शान्तो ब्रह्मविद्यापरायणः ॥ ८१ ॥ यदा मनसि
सम्पन्नं वैतृष्ण्यं सर्ववस्तुषु । तदा सन्न्यासमिच्छेत्तु पतितः
स्याद्विपर्य्यये ॥ ८२ ॥ प्राजापत्यां निरूप्येष्टिं आग्नेयीमथवा
पुनः । दान्तः पक्वकषायोऽसौ ब्रह्माश्रममुपाश्रयेत् ॥ ८३ ॥
सदन्ने वा कदन्ने वा लोष्ठे वा काञ्चने तथा । समबुद्धिर्यस्य शश्वत्
स सन्न्यासीति कीर्तितः ॥ ८४ ॥ शुद्धाचारद्विजान्नञ्च भुङ्क्ते
लोभादिवर्जितः । किन्तु किञ्चिन्न याचेत स सन्न्यासीति
कीर्तितः ॥ ८५ ॥ अयाचितोपस्थितञ्च मिष्टामिष्टञ्च भुक्तवान् ।
भक्षणार्थी न याचेत स सन्न्यासीति कीर्तितः ॥ ८६ ॥ सर्वत्र
समबुद्धिश्च हिंसामायाविवर्जितः । क्रोधाहङ्काररहितः स सन्न्या-
सीति कीर्तितः ॥ ८७ ॥ तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो
भवेत् सन्न्यासीह स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥ ८८ ॥

यस्त्वात्मरतिरेव स्यान्नित्यतृप्तो महामुनिः । सम्यक् स दमसम्पन्नः स योगी भिक्षुरुच्यते ॥ ८९ ॥ भैक्ष्यं श्रुतञ्च मौनित्वं तपो ध्यानं विशेषतः । सम्यक् च ज्ञानवैराग्यं धर्मोऽयं भिक्षुके मतः ॥ ९० ॥ योगी च त्रिविधो ज्ञेयो भौतिको मोक्ष एव च । तृतीयोऽन्त्याश्रमी प्रोक्तो योगमूर्तिसमाश्रितः ॥ ९१ ॥ प्रथमा भावना पूर्व्वे मोक्षे त्वक्षरभावना । तृतीये चान्तिमा प्रोक्ता भावना पारमेश्वरी ॥ ९२ ॥ यतीनां यतचित्तानां न्यासिनामूर्ध्वरेतसाम् । आनन्दं ब्रह्म तत्स्थानं यस्मान्नावर्त्तते मुनिः ॥ ९३ ॥ योगिनाममृतं स्थानं व्योमाख्यं परमाक्षरम् । आनन्दमैश्वरं यस्मान्मुक्तो नावर्त्तते नरः ॥ ९४ ॥ ज्ञानसन्न्यासिनः केचिद्वेदसन्न्यासिनोऽपरे । कर्म्मसन्न्यासिनस्त्वन्ये त्रिविधाः परिकीर्त्तिताः ॥ ९५ ॥ यः सर्व्वसङ्गनिर्मुक्तो निर्द्वन्द्वश्चाऽपि निर्भयः । प्रोच्यते ज्ञानसन्न्यासी स्वात्मन्येव व्यवस्थितः ॥ ९६ ॥ वेदमेवाऽभ्यसेन्नित्यं निराशीर्निष्परिग्रहः । प्रोच्यते वेदसन्न्यासी मुमुक्षुर्विजितेन्द्रियः ॥९७॥ यस्त्वग्नीनात्मसात् कृत्वा ब्रह्मार्पणपरो द्विजः । ज्ञेयः स कर्म्मसन्न्यासी महायज्ञपरायणः ॥ ९८ ॥ त्रयाणामपि चैतेषां ज्ञानी त्वभ्यधिको मतः । न तस्य विद्यते कर्म्म न लिङ्गादि विपश्चितः ॥ ९९ ॥ नाभिनन्देत मरणं नाऽभिनन्देत जीवितम् । कालमेव प्रतीक्षेत निर्देशं भृतको यथा ॥ १०० ॥ नाऽध्येतव्यं न वक्तव्यं न श्रोतव्यं कदाचन । एवं ज्ञानपरो योगी ब्रह्मभूयाय कल्पते ॥ १०१ । एकवासोऽथवा विद्वान् कौपीनाच्छादनोऽथवा । मुण्डः शिखी वाऽथ भवेत् त्रिदण्डी निष्परिग्रहः ॥ १०२ ॥ काषायवासाः सततं ध्यानयोगपरायणः । ग्रामान्ते वृक्षमूले वा वासी देवालयेऽपि वा ॥ १०३ ॥ समः शत्रौ तथा मित्रे तथा मानापमानयोः । भैक्ष्येण वर्त्तयेन्नित्यं नैकान्नादी भवेत् क्वचित् ॥ १०४ ॥ यस्तु मोहेन चाऽन्यस्मादेकान्नादी भवेद् यदि । न तस्य निष्कृतिः काचिद् धर्म्मशास्त्रेषु कथ्यते ॥ १०५ ॥ रागद्वेषविमुक्तात्मा समलोष्टाश्मकाञ्चनः । प्राणिहिंसानिवृत्तश्च मौनी स्यात्सर्व्वनिस्पृहः ॥ १०६ ॥ दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं

जलं पिबेत्। सत्यपूतां वदेद्वाणीं मनःपूतं समाचरेत् ॥ १०७ ॥ दम्भाहङ्कारनिर्मुक्तो निन्दापैशून्यवर्जितः। आत्मज्ञानगुणोपेतो यतिर्मोक्षमवाप्नुयात् ॥ १०८ ॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं तपः परम्। क्षमा दया च सन्तोषो व्रतान्यस्य विशेषतः ॥१०९॥ चतुर्विधा भिक्षवस्ते कुटीचकबहूदकौ। हंसः परमहंसश्च योऽत्र पश्चात्स उत्तमः ॥ ११० ॥

इति श्री सन्न्यासगीतायां सन्न्यासधर्म्मनिरूपणं
नाम षष्ठोऽध्यायः।

—०—

सप्तमोऽध्यायः

शुक उवाच।

परिव्राजकमूर्द्धन्य! प्रभो! सन्यासिनां गुरो!। श्रुतोऽस्माभिश्चतुर्णां हि धर्म्मः साधारणोऽनघ! ॥१॥ सन्यासिनां महाभाग! कृपया श्रावयस्व नः। कुटीचकस्य यः शास्त्रे विशिष्टो धर्म्म ईरितः ॥ २ ॥ पद्धतिर्या च सन्न्यासग्रहणे सम्मता सताम् ॥ ३ ॥

याज्ञवल्क्य उवाच।

मुमुक्षुः सत्युपरते गार्हस्थ्याच्चेतसि ध्रुवम्। वानप्रस्थं समाश्रित्य त्यागे पूर्णरुचिस्तथा ॥ ४ ॥ साधने योग्यतां लब्ध्वा संन्यासाश्रममाविशेत्। यद्वा विषयवैतृष्ण्यमात्मज्ञानार्जने तथा ॥ ५ ॥ उत्कटेच्छा प्रजायेत तदैव प्रव्रजेत्सुधीः। यतो वै प्राणिनां लोके गतिर्भाविन्यनिश्चिता ॥ ६ ॥ कुटीचकानां लक्ष्यं तु वक्ष्यमाणं निशामय। विषयवासनात्याग इन्द्रियाणाञ्च संयमः ॥ ७ ॥ दृष्टाऽनुश्रविकाणां हि विषायाणां विशेषतः। सङ्कल्पस्याग आख्यातः सकामस्य च कर्म्मणः ॥ ८ ॥ त्यागस्तथा गृहस्थानां वानप्रस्थगतस्य च। धर्म्मस्य त्यागः कथितो देहाध्यासनिवारणे ॥ ९ ॥ तथा प्रयत्नो बहुधा सर्व्वकर्म्मस्वपि ध्रुवम्। आत्मनैव समं योगो योगसाधनमेव च ॥ १० ॥ पराभक्तेस्तथा लाभस्तत्त्वज्ञानागमश्च ह। विषयेषु च वैराग्यं सन्न्यासे तीव्रकाङ्क्षिता ॥ ११ ॥ यदा

जायेत विप्रस्य तदैव प्रव्रजेद् गृहात् । कस्यचित्तुपयुक्तस्य गुरोः सन्न्यासिनोऽन्तिके ॥ १२ ॥ बद्धाञ्जलिर्नतशिरा दीक्षामभ्यर्थयेत् स्वयं । इत्थं कुटीचकव्रतं सम्प्रार्थ्यैव द्विजोत्तमः ॥ १३ ॥ प्रसाद्य देवर्षिपितॄन् देशे काले गुणान्विते । आकाङ्क्षेत ततो धीरः सन्न्यासव्रतधारणम् ॥ १४ ॥ कामिनीकाञ्चनत्यागो यावज्जीवन-धारणम् । निष्कामकर्मणोऽभ्यासो गुरौ भक्तिर्निरन्तरा ॥ १५ ॥ ब्रह्मणि च परा भक्तिस्तत्त्वज्ञानावलम्बनात् । अद्वैतभावनासिद्धि रेतत्सर्वं समासतः ॥ १६ ॥ सन्न्यासदीक्षाग्रहणे प्रधानं लक्ष्यमी-रितम् । आतुरस्य तु संन्यासे विशेषः कोऽपि नो विधिः ॥ १७ ॥ अल्पान्नाऽभ्यवहारेण रहःस्थानासनेन च । ह्रियमाणानि विषयैरि-न्द्रियाणि निवर्तयेत् ॥ १८ ॥ प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत् कृताः । व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥ १९ ॥ दह्यन्तेध्मायमानानां धातूनां हि यथा मलाः । तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥ २० ॥ प्राणस्योत्क्रमणासन्न-कालस्त्वातुरसंज्ञकः । नेतरस्त्वातुरः कालो मुक्तिमार्गप्रवर्तकः ॥२१॥ आतुरेऽपि च सन्न्यासे तत्तन्मन्त्रपुरःसरम् । मन्त्रावृत्तिश्च कृत्वैव सन्न्यसेद्विधिवद्बुधः ॥ २२ ॥ आतुरेऽपि क्रमे वाऽपि प्रेषभेदो न कुत्रचित् । न मन्त्रः कर्मरहितः कर्म मन्त्रमपेक्षते ॥ २३ ॥ अकर्म मन्त्ररहितं नाऽतो मन्त्रं परित्यजेत् । मन्त्रं विना कर्म कुर्यात् भस्मन्याहुतिवद्भवेत् ॥ २४ ॥ विध्युक्तकर्मसंक्षेपात् सन्न्यास-स्त्वातुरः स्मृतः । तस्मादातुरसन्न्यासे मन्त्रावृत्तिविधिर्ध्रुवम् ॥२५॥ आहिताऽग्निर्विरक्तश्चेद्देशान्तरगतो यदि । प्राजापत्येष्टिमप्स्वेव निर्वृत्त्यैवाऽथ सन्न्यसेत् ॥ २६ ॥ मनसा वाऽथ विध्युक्तमन्त्रा-वृत्त्याऽथवा जले । श्रुत्यनुष्ठानमार्गेण कर्मानुष्ठानमेव वा ॥ २७ ॥ आतुरस्य तु सन्न्यासे प्रेषमात्रं हि केवलम् । न श्राद्धादि न चाऽन्यत् स्याज्जलमध्यादिसर्पणम् ॥ २८ ॥ प्रेषं वक्तुम-शक्तश्चेद्वाचाऽसौ मनसैव हि । प्रेषं कुर्यात्स्वयं धीरो मरणे समुपस्थिते ॥ २९ ॥ आतुराणां तु सन्न्यासे न विधिर्नैव च क्रिया । प्रेषमात्रं समुच्चार्य सन्न्यासं तत्र कारयेत् ॥ ३० ॥

तनुं त्यजेद्धि यो विप्रः कृत्वा सन्न्यासमात्मवान् । मानसाद्वाचि-
काद्वाऽपि प्रेषाद्देवाऽत्र जायते ॥ ३१ ॥ कालान्तरेऽथवा सद्यो
ब्रह्मलोकं स गच्छति । सन्न्यस्तमिति यो ब्रूयात्प्राणैः कण्ठग-
तैरपि ॥ ३२ ॥ न तत्क्रतुसहस्रेण फलं प्राप्नोति मानवः । सन्न्य-
स्तमिति यो ब्रूयात्प्राणैः कण्ठगतैरपि ॥ ३३ ॥ स सूर्यमण्डलं
भित्त्वा ब्रह्मलोके महीयते । ब्रह्मणः प्रलये तेन ब्रह्मणा सह
धैर्य्यवान् ॥ ३४ ॥ महाभूतक्षये प्राप्ते परं ब्रह्माऽधिगच्छति ।
आपत्काले तु सन्न्यासः कर्त्तव्य इति शिष्यते ॥ ३५ ॥ जरया-
पलितेनैव शत्रुभिर्व्यथितेन च । सन्न्यसन्नातुरो विप्रो यदि
जीवति चेत्पुनः ॥ ३६ ॥ कर्त्तव्यः क्रमसन्न्यास आत्मश्रेयोऽभि-
काङ्क्षिणा । ततो नैमित्तिकान्पितॄन्सन्तर्प्य विधिपूर्वकम् ॥ ३७ ॥
नैमित्तिकांस्तथा देवान्प्रसाद्य सन्न्यसेद्बुधः । यतो वै दैवश-
क्तीनां पैतृकीणामिमे तथा ॥ ३८ ॥ प्रत्यक्षप्रतिनिधय आम्नाताः
सकला अपि । नैमित्तिकास्तु पितरो यावत्सप्तमपूरुषम् ॥ ३९ ॥
प्राधान्येनैव विज्ञेया देवा नैमित्तिकास्त्वमी । कुलदेवा ग्राम्यदेवा
वास्तुदेवाः प्रधानतः ॥ ४० ॥ गुरोः पुरोधसश्चैव ज्ञानवृद्धनृणां
तथा । अध्यात्मसम्बन्धयुजामेतेषामपि तोषणम् ॥ ४१ ॥ कृत्वैव
प्रव्रजेद्धीमान् चतुर्थे ह्याश्रमे शुचिः । यदि संस्कारशेषः स्यात्स्वयं
स्वश्राद्धमाचरेत् ॥ ४२ ॥ कुटीचकस्तु सन्न्यासी योगसाधन-
संयमौ । अभ्यसेद्धि विशेषेण पञ्चसाकारब्रह्मसु ॥ ४३ ॥ कस्मिं-
श्चिद्यत्र मनसो रुचिरुग्राऽस्ति तस्मै वै । तस्मिन्रूपे सदा ध्यायन्
ब्रह्मोपासनमाचरेत् ॥ ४४ ॥ आत्मीयकुलजातीनां त्यक्त्वा सम्ब-
न्धमप्युत । शरीरयात्रां निर्वोढुं धर्म्मात्मन्यात्मजे सति ॥ ४५ ॥
कुटीचकस्तु गृह्णीयादन्नवस्त्रे ततोऽपि च । एतत्स्वाश्रमनिष्ठानां
यतीनां नियतात्मनाम् ॥ ४६ ॥ भैक्षेण वर्तनं प्रोक्तं फलमूलै-
रथाऽपि वा । एककालं चरेद्भैक्ष्यं न प्रसज्येत विस्तरे ॥ ४७ ॥
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति । सप्तागारं चरेद्भैक्षम-
लाभे द्वे पुनश्चरेत् ॥ ४८ ॥ प्रक्षाल्य पात्रे भुञ्जीयादद्भिः प्रक्षालयेत्तु
तत् । अथवाऽन्यदुपादाय पात्रं भुञ्जीत नित्यशः ॥ ४९ ॥ भुक्त्वा

च संत्यजेत्पात्रं यात्रामात्रमलोलुपः । विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ॥ ५० ॥ वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् । गोदोहमात्रं तिष्ठेत कालं भिक्षुरधोमुखः ॥ ५१ ॥ भिक्षेत्युक्त्वा सकृत्तूष्णीमश्नीयाद्वाग्यतः शुचिः । प्रक्षाल्यपाणिपादौ च समाचम्य यथाविधि ॥ ५२ ॥ आदित्ये दर्शयित्वाऽन्नं भुञ्जीत प्राङ्मुखोऽम्बरः । हुत्वा प्राणाहुतीः पञ्च ग्रासानष्टौ समाहितः ॥ ५३ ॥ आचम्य देवं ब्रह्माणं ध्यायीत परमेश्वरम् । अलावुं दारुपात्रञ्च मृण्मयं वैणवं तथा ॥ ५४ ॥ चत्वारि यतिपात्राणि मनुराह प्रजापतिः । प्रदोषे पररात्रे च मध्यरात्रे तथैव च ॥५५॥ सन्ध्यास्वह्नि विशेषेण चिन्तयेन्नित्यमीश्वरम् ॥ ५६ ॥ विष्णुश्चिदा यस्तु सता शिवः सन् । स्वतेजसाऽर्कः स्वधिया गणेशः । देवी स्वशक्त्या कुशलं विधत्ते । कस्मैचिदस्मै प्रणतिः सदाऽऽस्ताम् ॥ ५७ ॥ त्रिपुरदलनदक्षश्चन्द्रखण्डावतंसः । कलितभसितलेपो हस्तविन्यस्तशूलः ॥ भवतु तव कपर्दी क्रीडदुन्मत्तगङ्गो-दधदधितनु देवीं त्र्यम्बको मङ्गलाय ॥ ५८ ॥ जयति सकलविघ्नध्वान्तविध्वंससूर्यो । मदपरिमललुब्धैः सेव्यमानो मिलिन्दैः ॥ निजचरणपरेभ्यो दिव्यभोगस्य दाता । विलसितरददण्डो हस्तितुण्डो गणेशः ॥ ५९ ॥ मघवमुखसुराणामुत्तमाङ्गेषु यस्याः । चरणनखरभासो माल्यभावं भजन्ति ॥ महिषकदनचण्डैः सायुधैर्बाहुदण्डै र्जयति विकटमूर्तिः प्रेयसी त्र्यम्बकस्य ॥ ६० ॥ वहति वियति यस्य स्यन्दनं ससप्तिः । सततमनुभचक्रं चोद्यमानोऽरुणेन ॥ स जयति तिमिराणां तक्षणे लब्धदीक्षो विरतविधुविकाशो बान्धवः पङ्कजानाम् ॥ ६१ ॥ अधिसलिलधितल्पीकृत्य शेषं शयानो द्रुहिणमभिनुवन्तं नाभिपद्मे दधानः ॥ चरणयुगलमङ्के क्लृप्तवानिन्दिरायाः । सजलजलदकान्तिः पातु नारायणो वः ॥ ६२ ॥ स्वस्वाकाशादिभूतप्रकृतिगुणयुजां साधकानां विमुक्त्यै । ब्रह्मैवैकं स्वमायाशबलितमभवत्पञ्चदेवात्मकं तत् ॥ नामाकारक्रियाभिर्वियदिव न भिदा वस्तुतोऽस्तीति तत्त्वम् । एकं पञ्चाऽपि पञ्चैकमपि बुधजनाः शान्तिसौख्यं भजन्तु ॥ ६३ ॥

एषु पञ्चसु रूपेषु यस्य कस्याऽपि निश्चितम् । गुरुणैवोपदिष्टेषु ध्यानं कुर्य्याद्यतात्मवान् ॥६४॥ सच्चिदेकं ब्रह्म इति रूपेण मुनिपुङ्गवाः ! ॥ व्रतानि यानि भिक्षूणां तथैवोपव्रतानि च॥६५॥एकैकातिक्रमे तेषां प्रायश्चित्तं विधीयते । उपेत्य च स्त्रियं कामात्प्रायश्चित्तं समाहितः॥६६॥ प्राणायामसमायुक्तं कुर्य्यात्सान्तपनं शुचिः । ततश्चरेत नियमान् कृत्स्नान् संयतमानसः ॥ ६७ ॥ पुनराश्रममागत्य चरेद्भिक्षुरतन्द्रितः । न नर्मयुक्तमनृतं हिनस्तीति मनीषिणः ॥ ६८ ॥ तथापि न च कर्त्तव्यः प्रसङ्गो ह्येष दारुणः । एकरात्रोपवासश्च प्राणायामशतं तथा ॥ ६९ ॥ उक्त्वाऽनृतं प्रकर्त्तव्यं यतिना धर्मलिप्सुना । परमापद्गतेनाऽपि न कार्य्यं स्तेयमन्यतः ॥ ७० ॥ स्तेयादभ्यधिकः कश्चित् नास्त्यधर्म इति स्मृतिः । हिंसा चैषा परा तृष्णा याच्ञाऽऽत्मज्ञाननाशिका ॥ ७१ ॥ यदेतद्द्रविणं नाम प्राणास्ते तु बहिश्चराः । स तस्य हरते प्राणान्यो यस्य हरते धनम् ॥ ७२ ॥ एवं कृत्वा स दुष्टात्मा भिन्नवृत्तौ व्रतच्युतः । भूयो निर्वेदमापन्नश्चरेचान्द्रायणं व्रतम् ॥ ७३ ॥ विधिना शास्त्रदृष्टेन सम्वत्सरामिति श्रुतिः । भूयो निर्वेदमापन्नश्चरेद्भिक्षुरतन्द्रितः ॥ ७४ ॥ अकस्मादपि हिंसां तु यदि भिक्षुः समाचरेत् । कुर्य्यात्कृच्छ्रातिकृच्छ्रन्तु चान्द्रायणमथापि वा ॥ ७५ ॥ स्कन्देदिन्द्रियदौर्बल्यात् स्त्रियं दृष्ट्वा यतिर्यदि । तेन धारयितव्या वै प्राणायामास्तु षोड़श ॥ ७६ ॥ दिवा स्वप्ने त्रिरात्रं स्यात्प्राणायामशतं तथा एकान्ने मधुमांसे [illegible] नवश्राद्धे तथैव च ॥ ७७ ॥ प्रत्यक्षलवणे चोक्तं प्राजापत्यं विशोधनम् । ध्याननिष्ठस्य सततं नश्यते सर्वपातकम् ॥ ७८ ॥ तस्मान्महेश्वरं ध्यात्वा तस्य ध्यानरतो भवेत् । यद् ब्रह्म परमं ज्योतिः प्रतिष्ठाक्षयमक्षयम् ॥ ७९ ॥ योऽन्तरात्मा परं ब्रह्म स विज्ञेयो महेश्वरः । एष देवो महादेवः केवलं परमेश्वरः ॥ ८० ॥ तदेवाऽक्षयमद्वैतं तदादित्यान्तरं परम् । यस्मान्महीयते देवः स्वधाम्नि ज्ञानसंज्ञिते ॥ ८१ ॥ आत्मयोगाह्वये तत्त्वे महादेवस्ततः स्मृतः । नाऽन्यं देवं महादेवात् व्यतिरिक्तं प्रपश्यति ॥८२॥ तमेवात्मानमन्वेति यः स याति परं पदम् ।

मन्यते ये स्वमात्मानं विभिन्नं परमेश्वरात् ॥ ८३ ॥ न ते पश्यन्ति तं देवं वृथा तेषां परिश्रमाः । एकमेव परं ब्रह्म विज्ञेयं तत्त्वमव्ययम् ॥ ८४ ॥ स देवस्तु महादेवो नैतद्विज्ञाय बध्यते । तस्माद्यत्नेन नियतं यतिः संयतमानसः ॥ ८५ ॥ ज्ञानयोगरतः शान्तो महादेवपरायणः । एष वः कथितो विप्रा यतीनामाश्रमः शुभः ॥ ८६ ॥ पितामहेन प्रभुणा मुनीनां पूर्वमीरितः ॥ ८७ ॥

इति श्रीसन्न्यासगीतायां कुटीचकधर्मनिरूपणं
नाम सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

शुक उवाच ।

ज्ञानिनामग्रणीः ! ब्रह्मन् ! श्रुतोऽस्माभिः सविस्तरः । कुटीचकस्य धर्मोऽयं विशिष्टस्त्वदनुग्रहात् ॥ १ ॥ बहूदकस्य यो धर्मो विशिष्टः समुदाहृतः । श्रावयाऽस्मानिदानीं त्वं भक्तानुग्रहकारकः ॥ २ ॥

याज्ञवल्क्य उवाच ।

कुटीचकस्तु सन्न्यासी पूर्वलक्षणलक्षितः । त्रिभिरेव हि वर्षैस्तु स बहूदकतां श्रयेत् ॥ ३ ॥ तत्त्वज्ञानेऽग्रसरतां विना किन्तु न तामियात् । बहूदकस्य धर्म्मेषु विशिष्टानि मुनीश्वराः ॥ ४ ॥ सर्वप्रधानानि तथा लक्ष्यानी[illegible]नि यानि वै । विश्वास्मना समं स्वस्य चैक्ये यत्नो विशेषतः ॥ [illegible] ॥ जगद्ब्रह्म स्वरूपं वै ज्ञात्वा निष्कामकर्मकृत् । केवलं स भवेन्नित्यं व्रतेऽस्मिन्निरतः शुचिः॥ ६ ॥ पूर्णतायास्तथा लाभः त्यागे तपसि यत्नतः । अनिकेतः स्थिरमतिस्तथा च दृढसंयमी ॥ ७ ॥ न केषुचिदभिष्वङ्गो कश्चनापि हि कुत्रचित् । तीर्थयात्राटनं चैव समासेन निबोधत ॥ ८ ॥ कामिनीकाञ्चनाभ्यां हि वैराग्यं मनसा यदि । पूर्णं नैवोपलब्धं चेन्न बहूदकतां श्रयेत् ॥ ९ ॥ संस्कारो ममतायाश्चेत्स्वजातिकुलबन्धुषु । न पूर्णं मनसा नष्टो न बहूदकतां श्रयेत् ॥१०॥ आत्म-

न्येव स्थितौ पूर्णा यदीच्छा नोपजायते । कदापि विप्रो धर्मज्ञो न बहूदकतां व्रजेत् ॥ ११ ॥ कुटीचकस्य यस्त्वाहुर्मनसा पूजनं सदा । देवर्षिनित्यपितृणां यच्चाहुर्वै ह्यमन्त्रकम् ॥१२॥ जगत्कल्याणबुद्ध्यैव महायज्ञविधानकम् । सर्वमेतच्च संप्रोक्तं ब्रह्माण्डस्यात्मना सह ॥१३॥ ज्ञेयं तन्मुनिभिर्नित्यमैक्यसम्बन्धवर्द्धकम् । तयोर्बहूदकस्याऽस्ति न निषेधो न वा विधिः ॥१४॥ सङ्कल्पमोहरहितो यस्मात्स परिकथ्यते । किन्त्वाश्रमागतानां वै धार्म्मिकाणान्तु सत्कृतिः ॥ १५ ॥ शिष्टाचारेण कर्तव्या सर्वैः सन्न्यासिभिः सदा । मर्य्यादां पालयन्न्यासी वर्णाश्रमविधेर्ध्रुवम् ॥१६॥ जगत्कल्याणबुद्ध्या वै शिष्टाचारपरो भवेत् । वाङ्मात्रेण नमस्कर्ता निम्नवर्णजुषां सताम् ॥ १७ ॥ साधूनामाश्रमाप्तानां इति शास्त्रविनिर्णयः । सैश्वर्यायाः स्थूलमूर्तेर्ब्रह्मणः परमेशितुः ॥१८॥ ध्यानेन यदि तृप्तः स्यात्सन्न्यासी तु बहूदकः । ज्योतिर्ध्यानेऽथवा बिन्दुध्याने कुर्याद्रतिं सदा ॥ १९ ॥ निर्गुणाया धारणाया ध्यानमेतत्सहायकम् । कृत्वा हृत्पद्मनिलये विश्वाख्यं विश्वसम्भवम् ॥२०॥ आत्मानं सर्वभूतानां परस्तात्तमसः स्थितम् । सर्वस्याधारमव्यक्तमानन्दं ज्योतिरव्ययम् ॥ २१ ॥ प्रधानपुरुषातीतमाकाशं दहनं परम् । तदन्तः सर्वभावानामीश्वरं ब्रह्मरूपिणम् ॥ २२ ॥ ध्यायेदनादिमद्वैतमानन्दादिगुणालयम् । महान्तं परमं ब्रह्म पुरुषं सत्यमव्ययम् ॥ २३ ॥ सितेतरारुणाकारं महेशं विश्वरूपिणम् । ओंकारान्तेऽथवात्मानं संस्थाप्य परमात्मनि ॥२४॥ आकाशे देवमीशानं ध्यायीताकाशमव्ययम् । कारणं सर्वभूतानां आनन्दैकसमाश्रयम् ॥ २५ ॥ पुराणं पुरुषं शम्भुं ध्यायन्मुच्येत बन्धनात् । यद्वा गुहायां प्रकृतौ जगत्सम्मोहनालये ॥ २६ ॥ विचिन्त्य परमं व्योम सर्वभूतैककारणम् । जीवनं सर्वभूतानां यत्र लोकः प्रलीयते ॥ २७ ॥ आनन्दं ब्रह्मणः सूक्ष्मं यत्पश्यन्ति मुमुक्षवः । तन्मध्ये निहितं ब्रह्म केवलं ज्ञानलक्षणम् ॥ २८ ॥ अनन्तं सत्यमीशानं विचिन्त्यासीत संयतः । गुह्याद्गुह्यतमं ज्ञानं यतीनामेतदीश्वरम् ॥ २९ ॥ योऽनुतिष्ठेत सततं सोऽश्नुते योग-

मीश्वरम् । तस्मात् ध्यानरतो नित्यमात्मविद्यापरायणः ॥ ३० ॥
ज्ञानं समभ्यसेद्ब्राह्मं मुच्यते भवबन्धनात् । यद्वा पृथक्त्वमा-
त्मानं सर्वस्मादेव केवलम् ॥३१॥ आनन्दमक्षरं ज्ञानं ध्यायीत च
पुनः परम् । यस्माद्भवन्ति भूतानि यद्गत्वा नेह जायते ॥ ३२ ॥ स
तस्मादीश्वरो देवः परस्ताद्योऽधितिष्ठति । यदन्तरे तद्गमनं शाश्वतं
शिवमव्ययम् ॥३३॥ यस्माद्धुस्तत्परो नाऽस्ति स देवः स्यान्महेश्वरः ।
शृणुध्वं ऋषयः सर्वे वेदवेदाङ्गपारगाः ॥ ३४ ॥ कालो दुरत्ययः
प्रोक्तस्तस्मादुपगते कलौ । तत्प्रभावात्प्रजाः सर्वा वर्णसङ्करतां
तथा ॥ ३५ ॥ कर्म्मसङ्करतां चाऽपि प्रायो यास्यन्ति भूतले ।
ब्राह्मणव्यतिरिक्ता ये ततो वर्णाः कलौ तदा ॥ ३६ ॥ प्रव्रज्यां धार-
यिष्यन्ति निवृत्तेरिच्छुकास्तथा । परिहारो नास्ति यस्य कालिकी
गतिरीदृशी ॥ ३७ ॥ यदि कालप्रभावेण ब्राह्मणेतरवर्णकाः ।
निवृत्तिमभिकाङ्क्षेरन् तदा पालनतत्पराः ॥ ३८ ॥ कुटीचकस्य
धर्म्मस्य भवेयुस्ते निरन्तरम् । तथा बहूदकस्याऽपि धर्मस्येति
विनिर्णयः ॥ ३९ ॥ धर्मो हंसस्य परमहंसस्याऽपि न युज्यते ।
अन्यथा पतनं तेषां भावीति शास्त्रसम्मतम् ॥ ४० ॥ तथाऽवद-
ध्युस्ते नित्यं लोकरक्षाकरी यथा । वर्णधर्मस्य मर्यादा न लुप्येत
कथञ्चन ॥४१॥ मनसा तेऽधिकारं हि महान्तमपि कञ्चन । कीदृशं
चाऽपि लभ्येरन् शरीरेण तु नित्यशः ॥ ४२ ॥ वर्णधर्म्मानुसारेण
वर्त्तेरन् विनयान्विताः । स्वो[illegible]वर्णस्य मर्यादाविचारं च पुनः
पुनः ॥४३॥ हृदि संस्थापयेयुस्[illegible]स्वीयामुन्नतिमिच्छवः । निम्नवर्ण-
भवास्ते वै स्वोच्चवर्णेन पूजनम् ॥ ४४ ॥ न कारयेयुः कथमप्युच्च-
वर्णाय ते तथा । न चापि दीक्षां दद्युर्वै श्रुतिस्मृतिवचास्त्विदम्
॥ ४५ ॥ वर्णं पृष्टाः केनचित्ते गोपयेयुः कथञ्चन । न हि स्ववर्णं
यस्माद्वै मूलमाहुर्महर्षयः ॥ ४६ ॥ वर्णाश्रमस्य धर्मं हि आर्यत्वस्य
दृढं ध्रुवम् । एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् ॥ ४७ ॥
सिद्धिमेकस्य संपश्यन् न जहाति न हीयते । अतिवादाँस्तितिक्षेत
नावमन्येत कञ्चन ॥ ४८ ॥ न चेमं देहमाश्रित्य वैरं कुर्व्वीत केन-
चित् । क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ॥ ४९ ॥ सप्त-

द्धारावकीर्णाश्च न वाचमनृतां वदेत्। अध्यात्मरतिरासीनो निर-पेक्षो निरामिषः ॥ ५० ॥ आत्मनैव सहायेन सुखार्थी विचरेदिह । न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ॥ ५१ ॥ नाऽनुशासन-वादाभ्यां भिक्षां लिप्सेत कर्हिचित्। न तापसैर्ब्राह्मणैर्वा वयो-भिरपि वा श्वभिः ॥ ५२ ॥ आकीर्णं भिक्षुकैर्वाऽन्यैरागारमुपसं-व्रजेत्। अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ॥ ५३ ॥ प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः । अभिपूजितलाभाँस्तु जुगुप्सेतैव सर्वशः ॥ ५४ ॥ अभिपूजितलाभश्च यतिर्मुक्तोऽपि बध्यते । इन्द्रियाणां निरोधेन रागद्वेषक्षयेन च ॥ ५५ ॥ अहिंसया च भूतानाममृतत्वाय कल्पते। अवेक्षेत गतीर्नृणां कर्मदोष-समुद्भवाः ॥ ५६ ॥ निरये चैव पतनं यातनाश्च यमक्षये । विप्रयोगं प्रियैश्चैव संयोगश्च तथाऽप्रियैः ॥५७॥ जरया चाऽभिभवनं व्याधि-भिश्चोपपीडनम् । देहादुत्क्रमणश्चास्मात्पुनर्गर्भे च सम्भवम् ॥५८॥ योनिकोटिसहस्रेषु सृतीश्चाऽस्यान्तरात्मनः । अधर्म्मप्रभवश्चैव दुःखयोगं शरीरिणाम् ॥ ५९ ॥ धर्म्मार्थप्रभवश्चैव सुखसंयोगम-क्षयम् । सूक्ष्मताश्चान्ववेक्षेत योगेन परमात्मनः ॥ ६० ॥ देहेषु च समुत्पत्तिं उत्तमेष्वधमेषु च । दूषितोऽपि चरेद्धर्म्मं यत्र तत्राऽ-श्रमे रतः ॥ ६१ ॥ समः सर्व्वेषु भूतेषु न लिङ्गं धर्म्मकारणम् । फलं कतकवृक्षस्य यद्यप्यम्बुप्रकाशकम् ॥ ६२ ॥ न नामग्रहणादेव तस्य वारि प्रसीदति । संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा ॥६३॥ शरीरस्याऽत्यये चैव समीक्ष्य वसुधां चरेत् । अह्ना रात्र्या च यान् जन्तून् हिनस्त्यज्ञानतो यतिः ॥ ६४ ॥ तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् षडाचरेत् । प्राणायामैर्दहेद्दोषान्धारणा-भिश्च किल्विषम् ॥ ६५ ॥ प्रत्याहारेण संसर्गान्ध्यानेनाऽनीश्वरान् गुणान् । अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ॥६६॥ चर्मा-वनद्धं दुर्गन्धिपूर्णं मूत्रपुरीषयोः । जराशोकसमाविष्टं रोगायतन-मातुरम् ॥६७॥ रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत् । प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् ॥ ६८ ॥ विसृज्य ध्यानयोगेन ब्रह्माऽभ्येति सनातनम् । यदा भावेन भवति सर्वभावेषु निस्पृहः

॥ ६९ ॥ तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् । अनेन विधिना सर्वांस्त्यक्त्वा संगान् शनैः शनैः ॥ ७० ॥ सर्वद्वन्द्व-विनिर्मुक्तो ब्रह्मण्येवावतिष्ठते । ध्यानिकं सर्व्वमेवैतत्तदेतदभिश-ब्दितम् ॥ ७१ ॥ न ह्यनध्यात्मवित्कश्चित् क्रियाफलमुपाश्नुते । अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च ॥७२॥ आध्यात्मिकञ्च सततं वेदान्ताभिहितं च यत् । इदं शरणमज्ञानामिदमेव विजानताम् ॥ ७३ ॥ इदमन्विच्छतां स्वर्गमिदमानन्त्यमिच्छताम् । अनेन क्रमयोगेन परिव्रजति यो द्विजः ॥ ७४ ॥ स विधूयेह पाप्मानं परं ब्रह्माधिगच्छति । एकरात्रं वसेद्ग्रामे नगरे पंचरात्रकम् ॥ ७५ ॥ वर्षाभ्योऽन्यत्र वर्षासु मासाँश्च चतुरो वसेत् । अभयं सर्वभूतेभ्यो दत्वा चरति यो मुनिः ॥ ७६ ॥ न तस्य सर्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥ ७७ ॥

इति श्रीसन्न्यासगीतायां बहूदकधर्म्मनिरूपणं नाम अष्टमोऽध्यायः

नवमोऽध्यायः ।

शुक उवाच ।

जगद्गुरो ! श्रुतोऽस्माभिर्भवतः कृपयाऽनघ । बहूदकदशा-यास्तु श्रोतव्यो धर्म उत्तमः ॥१॥ अधुना वै तृतीयाया विशेषं लक्षणं वद । अवस्थायास्तु हंस[illegible]न्यासिनोऽस्मान्कृतार्थयन् ॥२॥

याज्ञव[illegible] उवाच ।

यदा तु जायते विप्राः ! तत्त्वज्ञानस्य योग्यता । बहूदको भवेद्धीरस्तदाऽऽत्मानं समुन्नयन् ॥३॥ यदा च योग्यताप्राप्तिर्मनो-नाशस्य जायते । तदैव हंसावस्थायां विचरेद्योगिराण् मुदा ॥ ४ ॥ यद्येवं योग्यता न स्यात्तदा पूर्व्वोक्तयोर्वसेत् । हंसाधिकारे तत्त्वज्ञः निष्कामव्रततत्परः ॥ ५ ॥ ब्रह्म मत्वा जगद्रूपं कर्म्मयोगी मनो जयन् । जगत्यां सत्यधर्म्मस्य तत्त्वज्ञानस्य चैव हि ॥६॥ विस्तारे यत्नमादध्याद् व्रती भूत्वा निरन्तरम् । अस्यां दशायां सन्न्यासी

उन्नतं लभते पदम् ॥ ७ ॥ जगद्गुरोः प्रतिनिधेर्महनीयं महर्षयः। दृष्टाऽनुश्रविकाभ्यां चेद्विषयाभ्यां यदा नृणाम् ॥ ८ ॥ परवैराग्य-सम्प्राप्तिस्तदा हंसव्रतं चरेत्। पराभक्ते रहस्यं हि ज्ञात्वा साधक-सत्तमः ॥ ९ ॥ तत्त्वज्ञानं चाऽनुभूय तदा हंसव्रतं चरेत्। उत्तरो-त्तरमेतेषामाश्रमाणां विधारणे ॥ १० ॥ ज्ञानाऽधिकारप्राधान्यं न कालस्य प्रधानता। सन्न्यास्येतज्जगन्मान्यं धृत्वा हंसं महाव्रतम् ॥११॥ लभते ह्युत्तमां विप्राः! पदवीं वै जगद्गुरोः। स निष्काम कर्मयोगव्रतं धृत्वा महीं चरन् ॥ १२ ॥ लोककल्याणकर्त्तारमुपदेशं ददत्तथा। दीक्षादानं महत्कुर्वन्नभयञ्च प्रचारयेत् ॥१३॥ साधनानां परं तस्य राजयोगोऽस्ति साधनम्। तस्य व्रतमिदं ज्ञेयं निष्काम-व्रतमेव हि ॥१४॥ धारणाऽपि च सा तस्य जगत्कल्याणधारणा। ब्रह्मध्यानं हि तद्ध्यानं धर्मेषु सकलेष्वपि ॥ १५ ॥ ऐक्यबुद्धिस्तु बुद्धिः स्यात्सम्प्रदायेष्वपि भृशम्। मित्रे शत्रौ सुखे दुःखे स्त्रियां पुंसि तथैव च ॥ १६ ॥ स्वर्णे लोष्ठे चैषु साम्यं द्वन्द्वेष्वन्येष्वपि ध्रुवम्। समाधिः कथिता तस्य महामहिमशालिनः ॥ १७ ॥ जग-त्कल्याणबुद्ध्यैव केवलं देहधारणम्। तपः समीरितं तस्य सर्व-प्राणिहितैषिणः ॥ १८ ॥ ज्ञानोपदेशाज्जीवेभ्यस्त्वभयं दानमुत्तमम्। दानं स्वभावजं विद्धि तत्तस्य विदितात्मनः ॥ १९ ॥ तदैव सम्भ-वस्त्वस्या उन्नताया विशेषतः। दशाया हंस संज्ञाया यदा द्रष्टृत्व-माप्नुयात् ॥ २० ॥ सन्न्यासी [illegible]णां सप्तभूमिकायास्तथैव च। उपासनायाः सप्तानां भूमिकानां[illegible]ोश्वराः ॥ २१ ॥ भूमिकानाञ्च सप्तानां ज्ञानस्य परमर्षयः। र[illegible] स्यात्तस्य सप्त दर्शनानाञ्च हृद्गतम्। २२ ॥ चतुर्णां योगमार्गाणां सः स्याच्च पथदर्शकः। सन्न्यास्येतदवस्थाढ्यो मनसि प्रलयं गते ॥ २३ ॥ उन्नतायां दशायां हि ब्रह्मसद्भावमृच्छति। चतुर्धा गुरवो ज्ञेयास्तत्र शिक्षा-गुरुः खलु ॥२४॥ व्यावहारिकशिक्षायाः प्रवर्तक उदाहृतः। विद्या-गुरुर्यो वेदादि शास्त्रमध्यापयेत्सुधीः ॥ २५ ॥ दीक्षागुरुर्यः शिष्या-न्स्वान्योजयेदवधानतः। कर्मोपासनयोर्मध्येऽन्यतरस्मिन्विधानतः ॥२६॥ जगद्गुरुः स विज्ञेयः शिष्याननुपदिशन् हि यः। ब्रह्मविद्यां

नयेत्कालं लोकसङ्ग्रहणेच्छया ॥ २७ ॥ पूजनीयोऽधिकं त्वेषु परः पर इति स्मृतिः । अन्तिमस्तु विशेषेण साक्षाद् ब्रह्मस्वरूपभाक् ॥२८॥ असङ्कल्पाज्जयेत्कामं क्रोधं कामविवर्जनात् । अर्थानर्थेक्षया लोभं भयं तत्त्वावमर्षणात् ॥ २९ ॥ आन्वीक्षिक्या शोकमोहौ दम्भं महदुपासया । योगान्तरायान्मौनेन हिंसां कामाद्यनीहया ॥ ३० ॥ कृपया भूतजं दुःखं दैवं जह्यात्समाधिना । आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया ॥ ३१ ॥ रजस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च । एतत्सर्वं गुरौ भक्त्या पुरुषो ह्यञ्जसा जयेत् ॥ ३२ ॥ प्रवृत्तिश्च निवृत्तिश्च मार्गद्वयमुदीरितम् । गार्हस्थ्ये हि प्रवृत्तेर्वै स्ववसानं निगद्यते ॥ ३३ ॥ निवृत्तेः पूर्णतायुक्ता हंस एवाश्रमे ध्रुवम् । यतः परमहंसस्य निस्त्रैगुण्या दशा मता ॥ ३४ ॥ यथा गृहस्थ ऐश्वर्यभोगस्याकरणेन तु । तथा तच्चिन्हरहितो लज्जते जनसंसदि ॥ ३५ ॥ तयोस्तु स्वीकृतौ युक्ता लज्जा सन्न्यासिनस्तथा । परवैराग्यलक्ष्मैतद्धीरियं च यथार्थतः ॥ ३६ ॥ हठमन्त्रलयानां वै योगानां च यदा भवेत् । आचार्यस्तत्त्ववियोगी तदा हंसव्रतं चरेत् ॥३७॥ राजयोगे यदा पूर्णोऽधिकारी योगिराड् भवेत् । स महापुरुषो विप्राः ! तदा हंसव्रतं चरेत् ॥ ३८ ॥ भूमिकाकर्मयोगस्य शुभेच्छा प्रथमा स्मृता । विचारणा द्वितीया स्यात्तृतीया तनुमानसा ॥ ३९ ॥ सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका । परार्थाभावनी ष[illegible] सप्तमी तुर्यगा स्मृता ॥४०॥ पूर्णज्ञानं विनैतासां राजयोग[illegible]वेन्न हि । उपासनाया भक्तेश्च भूमिका गदतः शृणु ॥ ४१ ॥ [illegible]प्रथमा भूमिका नामपरा रूपपराऽपरा । स्याद्विभूतिपरा नाम्ना तृतीया भूमिका मता ॥ ४२ ॥ तथा शक्तिपरा नाम चतुर्थी भूमिका भवेत् । एवं गुणपरा ज्ञेया भूमिका पञ्चमी बुधैः ॥४३॥ षष्ठी भावपरा ज्ञेया सा स्वरूपपराऽन्तिमा । पूर्णज्ञानं विनैतासां राजयोगी भवेन्न हि ॥४४॥ ज्ञानस्य भूमिका विप्राः ! इमाः सर्वाः प्रकीर्तिताः । ज्ञानदा ज्ञानभूमेर्हि प्रथमा भूमिका मता ॥ ४५ ॥ सन्न्यासदा द्वितीया स्यात् तृतीया योगदा भवेत् । लीलोन्मुक्तिश्चतुर्थी वै पञ्चमी सत्पदा स्मृता

॥ ४६ ॥ षष्ठ्यानन्दपदा ज्ञेया सप्तमी तु परात्परा । पूर्णज्ञानं विनैतासां तद्वचानुभवं विना ॥ ४७ ॥ सम्बन्धज्ञानमन्योन्यमेता-सामन्तरा तथा । कथञ्चिदपि सन्न्यासी राजयोगी भवेन्न हि॥४८॥ उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः । ध्यानयोगेन सम्पश्येद्गति-मस्याऽन्तरात्मनः ॥४९॥ सम्यग्दर्शनसम्पन्नः कर्मभिर्न निबध्यते । दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥ ५० ॥ अहिंसयेन्द्रियाऽसङ्गै वैदिकैश्चैव कर्म्मभिः । तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम्॥५१॥ नदीकूलं यथा वृत्तो वृक्षं वा शकुनिर्यथा । तथात्यजन्निमं देहं कृच्छ्राद् ग्राहाद्विमुच्यते ॥ ५२ ॥ चतुर्भिरपि चैवैतैर्नित्यमाश्रमि-भिर्द्विजैः । दशलक्षणको धर्म्मः सेवितव्यः प्रयत्नतः ॥ ५३ ॥ धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः । धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम् ॥ ५४ ॥ दशलक्षमाणि धर्म्मस्य ये विप्राः समधीयते । अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम् ॥ ५५ ॥ येन सर्व्वमिदं प्रोतं सूत्रे मणिगणा इव । तत्सूत्रं धारयेद्योगी योगवित्तत्त्वदर्शिवान् ॥ ५६ ॥ बहिः सूत्रं त्यजेद्विद्वान् योगमुत्तम-मास्थितः । ब्रह्मभावमिदं सूत्रं धारयेद्यः सचेतनः ॥५७॥ धारणा-त्तस्य सूत्रस्य नोच्छिष्टो नाऽशुचिर्भवेत् । सूत्रमन्तर्गतं येषां ज्ञानयज्ञोपवीतिनाम् ॥ ५८ ॥ ते वै सूत्रविदो लोके ते च यज्ञोप-वीतिनः । ज्ञानशिखा ज्ञाननिष्ठा ज्ञानयज्ञोपवीतिनः ॥ ५९ ॥ ज्ञान-मेव परं तेषां पवित्रं ज्ञानमुच्यते । गुणत्रयस्य या नित्या धारणा तत्त्रिदण्डकम् ॥६०॥ यद्वाऽध्यात्माधिदैवाधिभौतिकत्रयधारणाम् । बुधास्त्रिदण्डं प्राहुर्वै तयोरन्तिमसूत्रकाम् ॥६१॥ प्रकृतेः पुरुषस्याऽपि द्रष्टुर्दृश्यस्य चैव हि । धारणां प्राहुरात्मज्ञा द्विदण्डमिति शब्दतः ॥६२॥ स्वरूपज्ञानमात्रेऽत्र स्थितिर्यस्य द्विजन्मनः । एकदण्डी स विज्ञेयः सर्वस्मादपि चोत्तमः ॥ ६३ ॥ तेषामेव स्मारका वै स्थूल-दण्डा इमे मताः । निवृत्तयेऽध्वश्रमतः श्वसर्पादिभयात्तथा ॥६४॥ दण्डं तु वैणवं सौम्यं सत्वचं समपर्वकम् । पुण्यस्थलसमुत्पन्नं नानाकल्मषशोधितम् ॥ ६५ ॥ अदग्धमहतं कीटैः पर्वग्रन्थिविरा-जितम् । नासादघ्नं शिरस्तुल्यं भ्रुवोर्वा बिभ्रियाद्यतिः ॥ ६६ ॥

दण्डात्मनोस्तु संयोगः सर्वथा हि विधीयते । न दण्डेन विना गच्छेदिषुक्षेपत्रयं बुधः ॥६७॥ सन्न्यासिनं द्विजं दृष्ट्वा स्थानाच्चलति भास्करः । एष मे मण्डलं भित्त्वा परं ब्रह्माऽधिगच्छति ॥ ६८ ॥ षष्टिं कुलान्यतीतानि षष्टिमागामिकानि च । कुलान्युद्धरते प्राज्ञः सन्न्यस्तमिति यो वदेत् ॥ ६९ ॥ ये च सन्तानजा दोषा ये दोषा देहसम्भवाः । प्रेषाऽग्निर्निर्दहेत्सर्व्वांस्तुषाऽग्निरिव काञ्चनम् ॥७०॥ कपालं वृक्षमूलानि कुचैलमसहायता । उपेक्षा सर्वभूतानामेता-वद्भिक्षुलक्षणम् ॥ ७१ ॥ यस्मिन् वाचः प्रविशन्ति कूपे त्रस्ता द्विपा इव । न वक्तारं पुनर्यान्ति स कैवल्याश्रमे वसेत् ॥ ७२ ॥ नैव पश्येन्न शृणुयादवाच्यं जातु कस्यचित् । ब्राह्मणानां विशेषेण नैव ब्रूयात्कथञ्चन ॥ ७३ ॥ यद्ब्राह्मणस्य कुशलं तदेव सततं वदेत् । तूष्णीमासीत निन्दायां कुर्व्वन्भैषज्यमात्मनः ॥ ७४ ॥ येन पूर्णमि-वाकाशं भवत्येकेन सर्व्वदा । शून्यं येन जनाकीर्णं तं देवा ब्राह्मणं विदुः ॥ ७५ ॥ येन केनचिदाच्छन्नो येन केनचिदाशितः । यत्र क्वचन शायी च तं देवा ब्राह्मणं विदुः ॥ ७६ ॥ अहेरिव गणाद्भीतः सौहि-त्यान्नरकादिव । कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः ॥ ७७ ॥ न क्रुध्येन्न प्रहृष्येच्च मानितोऽमानितश्च यः । सर्व्वभूतेष्व-भयदस्तं देवा ब्राह्मणं विदुः ॥ ७८ ॥ अनभ्याहतचित्तः स्यादन-भ्याहतवाग्भवेत् । निर्मुक्तः सर्वपापेभ्यो निरामित्रस्य किं भयम् ॥ ७९ ॥ अभयं सर्वभूतेभ्यो भूतानामभयं यतः । तस्य मोहाद्वि-मुक्तस्य भयं नाऽस्ति कुतश्चन ॥ ८० ॥ यथा नागपदेऽन्यानि पदानि पदगामिनाम् । एवं सर्वमहिंसायां धर्म्मार्थमपि धीयते ॥ ८१ ॥ वसति सोऽमृतो नित्यं यो हिंसां न प्रपद्यते । अहिंसकः समःसत्यो धृतिमान्नियतेन्द्रियः ॥ ८२ ॥ शरण्यः सर्व्वभूतानां गतिमाप्नोत्यनुत्तमाम् । एवं प्रज्ञानतृप्तस्य निर्भयस्य निराशिषः ॥ ८३ ॥ न मृत्योरतिगो भावः स मृत्युमधिगच्छति । विमुक्तं सर्व्वसङ्गेभ्यो मुनिमाकाशवत्स्थितम् ॥ ८४ ॥ अस्वमेकचरं शान्तं तं देवा ब्राह्मणं विदुः । जीवितं यस्य धर्म्मार्थं धर्म्मो हर्य्यर्थमेव च ॥ ८५ ॥ अहोरात्राश्च पुण्यार्थं तं देवा ब्राह्मणं विदुः । निरा-

शिषमनारम्भं निर्नमस्कारमस्तुतिम् ॥ ८६ ॥ निर्म्मुक्तं बन्धनैः सर्व्वैस्तं देवा ब्राह्मणं विदुः ॥८७॥ सर्वाणि भूतानि सुखे रमन्ते । सर्वाणि दुःखस्य भृशं त्रसन्ते । तेषां भयोत्पादनजातखेदः । कुर्यान्न कर्म्माणि हि श्रद्दधानः ॥ ८८ ॥ दानं हि भूताऽभयदक्षिणायाः । सर्वाणि दानान्यधितिष्ठतीह । तीक्ष्णां तनुं यः प्रथमं जहाति सोऽनन्त्यमाप्नोत्यभयं प्रजाभ्यः ॥ ८६ ॥

इति श्रीसन्न्यासगीतायां हंसधर्मनिरूपणं नाम नवमोऽध्यायः ॥

दशमोऽध्यायः ।

शुक उवाच ।

ब्रह्मर्षे ! श्रुतमस्माभिस्तवानुग्रहतः स्फुटम् । सन्न्यासधर्म्मत्रितयाऽधिकारस्य स्वरूपकम् ॥ १ ॥ अधुनाऽत्यन्तगहनमन्तिमस्य विशेषतः । अस्मान् परमहंसस्य स्वरूपं वर्णयन् विभो ! ॥ २ ॥ दशायाः सर्व्वतोऽर्हायाः कृतकृत्यान् कुरुष्वह ॥ ३ ॥

याज्ञवल्क्य उवाच ।

भेदः परमहंसस्य ब्रह्मणा सह[illegible]ऽपि न । अहमेवाऽस्मि ब्रह्मेति भावस्यानुभवं विना ॥४॥ क[illegible]रमहंसस्य पदवीं लभते नहि । द्वैतभानं दशायाश्चाप्यस्यां नैव [illegible]जायते ॥ ५ ॥ सच्चिदानन्दरूपा याऽप्यद्वैतस्थितिरुत्तमा । [illegible]मेव दशायां सा त्वन्तिमायां प्रवर्त्तते ॥ ६ ॥ तदानीं जायते[illegible]ऽत्मारामः सन्न्यासिसत्तमः । आत्मारामत्वसम्प्रासावपि द्वैविध्यमूह्यताम् ॥ ७ ॥ परमहंसस्य प्रारब्धकर्म्मवैचित्र्यदर्शनात् । ईशकोटिर्ब्रह्मकोटिरिति द्वे नामनी श्रुते ॥ ८ ॥ परहंसो ब्रह्मकोटेर्मूकस्तब्धो जडस्तथा । उन्मतो बालचेष्टश्च न जगत्तेन लाभवत् ॥ ६ ॥ परहंसस्त्वीशकोटेः परां काष्ठां गतोऽनिशम् । निष्कामस्य व्रतस्यात्र जगज्जन्मादि शक्तिमत् ॥ १० ॥ जगदीशप्रतिनिधिर्भूत्वा तत्कर्मसंरतः । जगद्धितार्थं विप्रर्षे ! एनं विद्धीशरूपिणम् ॥ ११ ॥ परहंसस्त्वी-

कोटेर्ब्रह्मरूपधरोऽपि सन् । देवर्षिशक्तियुक्तश्च भवतीति विनिश्चयः ॥ १२ ॥ ज्ञानदाता भयत्राता स एव जगतां मतः । ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते ॥ १३ ॥ काष्ठदण्डो धृतो येन सर्व्वाशी ज्ञानवर्जितः । स याति नरकान् घोरान् महारौरवसंज्ञितान् ॥१४॥ प्रतिष्ठा सूकरीविष्ठासमा गीता महर्षिभिः । तस्मादेनां परित्यज्य कीटवत् पर्य्यटेद्व यतिः ॥ १५ ॥ अयाचितं यथालाभं भोजनाच्छादनं भवेत् । परेच्छया च दिग्वासाः स्नानं कुर्यात् परेच्छया ॥ १६ ॥ स्वप्नेऽपि यो हि युक्तःस्याज्जाग्रतीव विशेषतः । ईदृक्चेष्टः स्मृतः श्रेष्ठो वरिष्ठो ब्रह्मवादिनाम् ॥ १७ ॥ पांसुना च प्रतिच्छन्नशून्यागारप्रतिश्रयः । वृक्षमूलनिकेतो वा त्यक्तसर्वप्रियाऽप्रियः ॥ १८ ॥ यत्रास्तमितशायी स्यान्निरग्निरनिकेतनः । यथालब्धोपजीवी स्यान्मुनिर्दान्तो जितेन्द्रियः ॥१९॥ निष्क्रम्य वनमास्थाय ज्ञानयज्ञो गतस्पृहः । कालकाङ्क्षी चरन्नेव ब्रह्मभूयाय कल्पते ॥ २० ॥ निर्मानश्चाऽनहंकारो निर्द्वन्द्वश्छिन्नसंशयः । नैव क्रुध्यति न द्वेष्टि नाऽनृतं भाषते गिरा ॥ २१ ॥ पुण्यायतनचारी च भूतानाम[illegible]हिंसकः । काले प्राप्ते चरन् भैक्षं ब्रह्मभूयाय कल्पते ॥ २२ ॥ [illegible]ानप्रस्थगृहस्थाभ्यां न संसृज्येत कर्हिचित् । अज्ञातचर्य्यां ति[illegible] न चैनं हर्ष आविशेत् ॥२३॥ नासच्छास्त्रेषु सज्जेत नोप[illegible] जीविकाम् । अतिवादाँस्त्यजेत्तर्कान् पक्षं कञ्चन नाश्रयेत् ॥ [illegible] ॥ न शिष्याननुबध्नीत ग्रन्थान्नैवाऽभ्यसेद्बहून् । न व्याख[illegible]पयुञ्जीत नाऽरम्भानारभेत् क्वचित् ॥ २५ ॥ अव्यक्तलिङ्गो[illegible]क्तार्थो मुनिरुन्मत्तबालवत् । कविर्मूकवदात्मानं तद्दृष्ट्या दर्शयेन्नृणाम् ॥ २६ ॥ न कुर्यान्न वदेत्किञ्चिन्न ध्यायेत्साध्वसाधु वा । आत्मारामोऽनया वृत्त्या विचरेज्जड़वन्मुनिः ॥ २७ ॥ एकश्चरेन्महीमेतां निःसङ्गः सयंतेन्द्रियः । आत्मक्रीड आत्मरतिरात्मवान् समदर्शनः ॥ २८ ॥ बुधो बालकवत्क्रीडेत्कुशलो जड़वच्चरेत् । वदेदुन्मत्तवद्विद्वान् गोचर्य्यान्नैगमश्चरेत् ॥ २९ ॥ क्षिप्तोऽवमानितोऽसद्भिः प्रलब्धोऽसूयितोऽपि वा । ताडितः सन्निरुद्धो वा वृत्त्या वा परिहापितः ॥ ३० ॥ विष्ठितो

मूत्रितो वाऽज्ञैर्बहुधैवं प्रकम्पितः । श्रेयस्कामः कृच्छ्रगत आत्मना-
त्मानमुद्धरेत् ॥ ३१ ॥ सम्माननं परां हानिं योगर्द्धेः कुरुते यतः ।
जनेनावमतो योगी योगसिद्धिञ्च विन्दति ॥ ३२ ॥ तथा चरेत
वै योगी सतां धर्ममदूषयन् । जना यथाऽवमन्येरन् गच्छेयुर्नैव
सङ्गतिम् ॥३३॥ जरायुजाण्डजादीनां वाङ्मनःकायकर्मभिः । युक्तः
कुर्व्वीत न द्रोहं सर्व्वसङ्गांश्च वर्जयेत् ॥३४॥ सर्वत्र विचरन्मौनी
वायुवद्वीतकल्मषः । समदुःखसुखः क्षान्तो हस्तप्राप्तञ्च भक्षयेत्
॥ ३५ ॥ जीवन्मुक्तोऽपि मुनयः ! ब्रह्मकोटेरयं पुनः । मूकस्तन्धो
बालचेष्टो बहिरेव हि लक्ष्यते ॥ ३६ ॥ अन्तःकरणमध्ये तु ब्रह्म-
सद्भावमाप्तवान् । आत्मारामोभवन्नित्यं लोकदृष्टौ जडो मतः
॥ ३७ ॥ साक्षात्तु जगतः कश्चित्तस्माल्लाभो न दृश्यते । जीव-
न्मुक्तस्येशकोटेर्विपरीता त्वितो दशा ॥ ३८ ॥ सकलं कर्म्म कुर्वा-
णोऽप्यकर्मी गीयते हि सः । ऋषिश्रेष्ठाः ! ब्रह्मकोटेर्जीवन्मुक्ता
मतास्त्विमे ॥ ३९ ॥ सनकः प्रथमो ज्ञेयो द्वितीयस्तु सनन्दनः ।
सनातनस्तृतीयः सनत्कुमारस्तुरीयकः ॥ ४० ॥ ईशकोटेर्भव-
न्तश्च दृष्टान्ताः समुदीरिताः । न[illegible]सुतेयं भवतामाचार्यत्वं
तथा मम ॥ ४१ ॥ इदानीं स्था[illegible]न्त एते युष्माभिर्जगतीतले ।
प्रचारार्थं निवृत्तेर्हि धर्म्मस्य स्तो[illegible]वराः ! ॥ ४२ ॥ भवद्भिरत्र
यत्किञ्चिदिदानीं कृतमुत्तमम् । [illegible]द् गीयतेऽकर्म्म महायज्ञश्च
वै सदा ॥ ४३ ॥ कर्म्मणो ह्यपि बोद्धव्यं बोद्धव्यञ्च विकर्म्मणः ।
अकर्म्मणश्च बोद्धव्यं गहना कर्म्मणो गतिः ॥ ४४ ॥ कर्म्मण्य-
कर्म यः पश्येदकर्म्माणि च कर्म्म यः । स बुद्धिमान् मनुष्येषु स
युक्तः कृत्स्नकर्मकृत् ॥ ४५ ॥ यस्य सर्व्वे समारम्भाः काम-
सङ्कल्पवर्जिताः । ज्ञानाऽग्निदग्धकर्म्माणं तमाहुः पण्डितं बुधाः
॥ ४६ ॥ त्यक्त्वा कर्मफलाऽसङ्गं नित्यतृप्तो निराश्रयः । कर्म्म-
ण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥ ४७ ॥ अयं निजः
परो वेति गणना लघुचेतसाम् । उदारचरितानान्तु वसुधैव
कुटुम्बकम् ॥ ४८ ॥ गुरुर्मनुष्यजातेस्तु ह्यार्य्यजातिर्मता शुभा ।
आर्य्यजातेर्ब्राह्मणा हि ब्राह्मणानान्तु न्यासिनः ॥ ४९ ॥ ब्राह्मणेषु

तपोवृद्धाः श्रेष्ठास्तत्र प्रकीर्तिताः । तेष्वपि ज्ञानवृद्धा ये तत्राऽपि तत्त्वदर्शिनः ॥ ५० ॥ तत्त्वदर्शिषु ये युक्ता आत्मारामाश्च तेषु वै । न्यासिषु क्रमशः श्रेष्ठाः कुटीचकबहूदकौ ॥ ५१ ॥ हंसः परमहंसश्च यद्यप्येतत् तथापि ह । आत्मारामत्वमेवैषां लक्ष्यमत्र प्रकीर्तितम् ॥ ५२ ॥ मानवः प्रथमं स्वस्मिन्नार्य्यभावं विधारयन् । धर्म्मं हि मनुते मुख्यं तदा गार्हस्थ्यमाश्रितः ॥ ५३ ॥ पुत्रेषु च कलत्रेषु तथेष्टमित्रबन्धुषु । आत्मत्त्वं तेषु नियतं विलीनयति धर्मवित् ॥ ५४ ॥ देशवासिषु तत्पश्चाज्जगत्सु च ततः परम् । विलीने त्वेवमात्मत्वे वसुधैव कुटुम्बकम् ॥ ५५ ॥ मनुते तत्त्व-विज्ज्ञानी जगद्धितपरायणः । इयं परमहंसस्य गतिः श्रेष्ठा निगद्यते ॥ ५६ ॥ जीवन्मुक्तदशाऽपीयं ज्ञानिनः परिकीर्तिता । निमज्ज्योन्मज्जतां घोरे भवाब्धौ परमायणम् ॥ ५७ ॥ सन्तो ब्रह्मविदः शान्ता नौ दृढेवाप्सु मज्जताम् । सन्तो दिशन्ति चक्षूंषि बहिरर्कः समुत्थितः ॥ ५८ ॥ देवता बान्धवाः सन्तः सन्तो ब्रह्मस्वरूपिणः । [illegible]ते भविष्यञ्च वर्त्तमाने न तिष्ठति ॥ ५९ ॥ न संस्मरत्यतीत[illegible]र्व्वमेव करोति च । अन्तःसर्व्व-परित्यागी नित्यमन्तरनीष[illegible] ॥ ६० ॥ कुर्व्वन्नपि बहिः कार्य्यं सममेवावतिष्ठते । बहि[illegible]शो तसर्व्वेहो यथाप्राप्तक्रियोन्मुखः ॥ ६१ ॥ स्वकर्म्मक्रमसम्प्रा[illegible]कार्य्यानुवृत्तिमान् । समग्रसुख-भोगात्मा सर्व्वाशास्विव सं[illegible] ॥ ६२ ॥ करोत्यखिलकर्म्माणि त्यक्तकर्तृत्वविभ्रमः । उदासी[illegible]सीनः प्रकृतक्रमकर्म्मसु ॥६३॥ नाऽभिवाञ्छति न द्वेष्टि न [illegible]ति न हृष्यति । अनुबन्धपरे-जन्तावसंसक्तेन चेतसा ॥ ६४ ॥ भक्ते भक्तसमाचारः शठे शठ इव स्थितः । बालो बालेषु वृद्धेषु वृद्धो धीरेऽतिधैर्य्यवान् ॥ ६५ ॥ युवा यौवनवृत्तेषु दुःखितेष्वनुदुःखितः । प्रवृत्तवाक् पुण्यकथो दैन्याद्व्यपगताशयः ॥ ६६ ॥ धीरधीरुदितानन्दः पेशलः पुण्य-कीर्तनः । प्राज्ञः प्रसन्नमधुरः पूर्णः स्वप्रतिमोदये ॥ ६७ ॥ निर-स्तखेददौर्गत्यः सर्वस्मिन्स्निग्धबान्धवः । उदारचरिताकारः समः सौम्यसुखोदधिः ॥ ६८ ॥ सुस्निग्धः शीतलस्पर्शः पूर्णचन्द्र इवो-

दितः । न तस्य सुकृतेनाऽर्थो न भोगैर्न च कर्म्मभिः ॥ ६९ ॥ न दुष्कृतैर्न भोगानां सन्त्यागेन च बन्धुभिः । न कार्यकारणारम्भैर्न निष्कृतितया तथा ॥ ७० ॥ न बन्धेन न मोक्षेण न पातालेन नो दिवा । यथा वस्तु यथा दृष्टं जगदेकमयात्मकम् ॥ ७१ ॥ तदा बन्धविमोक्षाभ्यां न किञ्चित्कृपणं मनः । सम्यक् ज्ञानाऽग्निना यस्य दग्धाः सन्देहजालिकाः ॥ ७२ ॥ निःशङ्कमलमुड्डीनस्तस्य चित्तविहङ्गमः । स तिष्ठन्नपि कार्य्येषु देशकालक्रियाक्रमैः ॥ ७३ ॥ न कार्य्यसुखदुःखाभ्यां मनागपि हि गृह्यते । बहिः प्रकृत-सर्व्वार्थोऽप्यन्तः पुनरनीहया ॥ ७४ ॥ न सत्तां योजयत्यर्थे न फलान्यनुधावति । नोपेक्षते दुःखदशां न सुखाशामपेक्षते ॥ ७५ ॥ कार्योदये नैति मुदं कार्य्यनाशे न खिद्यते । आमूलान्मनसि क्षीणे सङ्कल्पस्य कथा च का ॥ ७६ ॥ तिलेष्विवाग्निदग्धेषु तैलस्य कलना कुतः । न त्यजन्ति न वाञ्छन्ति व्यवहारं जगद्गतम् ॥ ७७ ॥ सर्वमेवानुवर्त्तन्ते पारावारविदो जनाः । सुशून्येऽपि न खिद्यन्ते देवोद्याने न [illegible]ः ॥ ७८ ॥ नियतिञ्च न मुञ्चन्ति महान्तो भास्करा इव [illegible]रन्नपि संसारे जीवन्मुक्तमना मुनिः ॥ ७९ ॥ आदिमध्या[illegible]रसो विहसेज्जागतीर्गतीः । रुदतो हसतश्चैव जीवन्मुक्तस्य हि[illegible]ऽतु ॥८०॥ न दुःखं न सुखं किञ्चिदन्तर्भवति न स्थितम् । वै[illegible]ाः सरागाभा अकोपाः कोपसंयुताः ॥ ८१ ॥ अमोहा मो[illegible]वलिता दृश्यन्ते तत्त्वदर्शिनः । इदं सुखमिदं दुःखमित्यादि [illegible]स्तु ताः ॥ ८२ ॥ अलं दूरगतास्तेषां अङ्कुरा नभसो य[illegible] यस्य स्थिता भवेत् प्रज्ञा यस्यानन्दो निरन्तरः ॥ ८३ ॥ प्रपञ्चोऽपि स्मृतप्रायः स जीवन्मुक्त इष्यते । लीनधीरपि जागर्ति यो जाग्रद्धर्म्मवर्जितः ॥ ८४ ॥ बोधो निर्वासनो यस्य स जीवन्मुक्त इष्यते । वर्तमानेऽपि देहेस्मिञ्छायावदनुवर्त्तिनि ॥८५॥ अहंताममताऽभावो जीवन्मुक्तस्य लक्षणम् । न प्रत्यग्ब्रह्मणो र्भेदं कदापि ब्रह्मसर्गयोः ॥ ८६ ॥ प्रज्ञया यो विजानाति स जीवन्मुक्तलक्षणः । जीवः शिवः सर्व एव भूतेष्वेवं व्यवस्थितः ॥ ८७ ॥ एवमेवाभिपश्यन्ति जीव-

न्मुक्तास्त ईरिताः । अतीताऽननुसन्धानं भविष्यदविचारणम् ॥ ८८ ॥ औदासीन्यमपि प्राप्तं जीवन्मुक्तस्य लक्षणम् । साक्षाद्-ब्रह्मस्वरूपास्ते जीवन्मुक्ताः सदेहशाः ॥ ८९ ॥ मूर्तिमद्ब्रह्म-रूपा हि सत्यमेतद्ब्रवीम्यहम् ॥ ९० ॥

इति श्रीसन्न्यासगीतायां परमहंसधर्म्मनिरूपणं नाम दशमोऽध्यायः ॥

एकादशोऽध्यायः ।

शुक उवाच ।

प्रभो ! परमहंसानामादर्श ! विश्वपूजित ! जगद्गुरो ! हे सर्वज्ञ ! सर्व्वधीरत्नवारिधे ! ॥ १ ॥ शृण्मः परमहंसस्य रूपं स्म लक्षणानि च । ब्रह्मकोटीशकोट्योश्च जीवन्मुक्तस्य तत्वतः ॥ २ ॥ पृथक् पृथक् लक्षणानि ज्ञा[illegible]नि विशेषतः । प्रसादादेव भवतो जानीमो वयमाश्रिताः ॥ [illegible] योगीनामारुरुक्षूणां साधनायां कलौ युगे । कीदृक् [illegible] विधेयं तत् स्फुटं विज्ञापय प्रभो ! ॥ ४ ॥ त्वयैवाऽ[illegible]शो[illegible] कलिकालो दुरत्ययः । सन्न्या-सिनोऽपि नो यान्ति निष्कृतिं [illegible]लधर्मतः ॥ ५ ॥ सन्न्यासिनः कृतार्थाः स्युर्यया धारणया [illegible]। सम्यक्तदुपदेशेन कृतार्थान् कुरु नो गुरो ! ॥ ६ ॥

याज्ञवल्[illegible] उवाच ।

सन्न्यासिनां द्वे अवस्थे भेदात् प्रकृतिलक्ष्ययोः । यथा विविदिषाविद्वत्सन्न्यासाविति साधकाः ! ॥ ७ ॥ द्विविधस्यास्य भेदस्य वस्तुतो मूलकारणम् । ज्ञानानां तारतम्यं स्यादत्र मान-मृषिस्मृतिः ॥ ८ ॥ सन्न्यासिनोऽन्तःकरणे यावज्ज्ञानं विकाशते । दृढं दृश्येषु वैराग्यं तावदेव प्रजायते ॥ ९ ॥ यावद् विषयवैरा-ग्यमेधते योगिनां हृदि । उदेति तावदेवाऽत्र योगसिद्धिरनाविला ॥ १० ॥ विद्वत्सन्न्यासतः पूर्व्वं शुभा विविदिषा ध्रुवा ।

आयातीत्येष नियमः क्वचिद् व्यभिचरत्यपि ॥ ११ ॥ कदाचि-
त्साधकः कश्चित् पूर्वसंस्कारतः क्वचित् । प्रागेव विद्वत्सन्न्यास-
मासाद्यैति कृतार्थताम् ॥ १२ ॥ यथा प्रारब्धकर्माणि जात्यादीन्
जनयन्ति हि । धारणामप्यत्र तद्वज्ज्ञानलाभोपयोगिनीम् ॥१३॥
प्रधानधारणाकर्म्मण्यधिकारित्वमागताः । कर्त्तुं स्वरूपोपलब्धिं
शक्नुवन्त्यविलम्बिताम् ॥ १४ ॥ इत्थन्ते योगिनः सम्यगनाया-
समनाविलम् । योगारूढत्वमापन्ना लभन्ते परमं पदम् ॥ १५ ॥
नैवमस्त्यारुरुक्षूणां किन्तु नूनमपेक्ष्यते । तैरत्र क्रमसन्न्यासः कृत-
कृत्यस्वसिद्धये ॥ १६ ॥ ततो हि वेदे सन्न्यासाश्रमस्य परिवी-
क्ष्यते । भेदश्चतुर्धा यत् पूर्वमहं सुस्फुटमुक्तवान् ॥ १७ ॥ प्रार-
ब्धज-प्रकृतितः क्रमसन्न्याससंजुषाम् । ब्रह्मनिष्ठाऽऽत्मनिष्ठेति
नाम्ना भेदो द्विधा मतः ॥ १८ ॥ पूर्वं गृहीतप्रवृत्तिनिवृत्तिधर्म्म-
सम्भवः । संस्कार एव हेतुः सोऽवस्थयोरनयोर्मतः ॥ १९ ॥
वासनातो विना नैव संस्कारो जायते क्वचित् । संस्कारतः कर्म्म
तस्मात् संस्कारो जायते पुनः ॥ [illegible] । संस्कारस्य विशुद्धत्वे
कर्म्मणोऽपि विशुद्धता । विशु[illegible]जनितज्ञानान्मोक्षः प्रका-
शते ॥ २१ ॥ तत्वज्ञानं मनोना[illegible]सनायाः क्षयोऽपि च ।
आविर्भवन्ति युगपदपवर्गदशा[illegible]२ ॥ निवृत्तिधर्माज्जीवानां
यत्परं घटते पदम् । भावशु[illegible]त्त्युत्थधर्मतोऽप्यन्त एव तत्
॥ २३ ॥ अस्य भेदद्वयस्यैतत्का[illegible] मत्रामीक्ष्यते । ब्रह्मनिष्ठाऽ-
त्मनिष्ठत्वदशा भवति संस्कृ[illegible]४ ॥ स्वार्थश्च परमार्थश्च
परोपकार इत्यपि । चतुर्विधा[illegible] परमोपकार इति वासना
॥ २५ ॥ ऐहिकाऽभ्युदयस्तत्र स्वार्थो विद्वद्भिरुच्यते । स्वीयाऽ-
मुष्मिककल्याणं परमार्थः प्रकीर्तितः ॥ २६ ॥ अपरैहिककल्याणं
परोपकार उच्यते । अपराऽमुष्मिकशिवं सकलान्तस्य लक्षणम्
॥२७॥ स्वार्थः परोपकारश्च जीवानां लक्ष्यतामितः । परमार्थश्च पर-
मोपकारश्चोच्चयोगिनाम् ॥ २८ ॥ सन्न्यासिनस्त एवाऽत्र केचनैव
निरामयम् । स्वमोक्षमेवाप्नुवन्तो यान्त्येव कृतकृत्यताम् ॥२९॥
अन्येऽधिकारिणः केचित् आत्मनो जगता समम् । संस्थाप्यैकत्व-

सम्बन्धं यतन्ते सर्व्वमुक्तये ॥ ३० ॥ ब्रह्मकोटिर्यदाप्नोति पदं सुखमनामयम् । यदीशकोटिर्लभते तदेकमेव यद्यपि ॥ ३१ ॥ तथापि भेद आद्येन परोक्षं जगतो हितम् । अन्त्येन जीवन्मुक्तेन साक्षाद्भवति मङ्गलम् ॥ ३२ ॥ न विश्वं लभते किञ्चित् प्रत्यक्षं फलमादितः । भाविकालाश्रयाद्यस्मात्तत्कर्म विश्वभद्रकृत् ॥ ३३ ॥ जीवन्मुक्त ईशकोटिः पूर्वस्मादेव वस्तुतः । परमोपकारतत्त्वाधिकारित्वं समाश्रयन् ॥ ३४ ॥ जगद्गुरुत्वमापन्नोऽध्यात्मज्ञानं प्रचारयन् । विश्वप्रभूतकल्याणं जनयत्यविलम्बितम् ॥ ३५ ॥ तत्कर्माण्यपि साधूनि कालमाश्रित्य भाविनि । भुवने कालसर्गस्य कारणानि भवन्त्यलम् ॥ ३६ ॥ सतः समुचितात् केन्द्रान्नूनं भगवदिङ्गितैः । स कर्त्तुं भगवत्कार्यं प्रभवत्यनुपद्रवम् ॥ ३७ ॥ एतादृगेव परमहंसादर्शो जगद्गुरुः । जीवन्मुक्तो हि सर्वेषां कल्याणं कर्तुमर्हति ॥ ३८ ॥ सन्न्यासमिच्छतां काले योगिनां सावधानता । विशेषतोऽपेक्षणीया यस्मात् कालो दुरत्ययः ॥ ३९ ॥ कुटीचको [illegible] भवतु विद्यतां वा बहूदकः । हंसो वाऽऽस्तां हि परमो हंसो [illegible] विवेकवान् ॥ ४० ॥ विधाय दृष्टिं परमोपकारे तत्त्व इष्टदे । [illegible]व परं ब्रह्म ब्रह्मैव परमं जगत् ॥ ४१ ॥ इत्यस्य सम्यङ् म[illegible]शो[illegible]यसिद्धान्तमाश्रयन् । सन्न्याससोपानततौ सर्व्वो ह्यग्रस[illegible] भवेत् ॥ ४२ ॥ सत्कर्मोपासनाज्ञानमेतद्यज्ञत्रयं क्रमात् । [illegible]ऽत्रिधानां हि शुद्धीनां कारणं कीर्तितं परम् ॥४३॥ अधिभूत[illegible]यज्ञात् शुद्धिं समधिगच्छति । पूर्णाहुतिर्भवत्यस्य निष्कामक[illegible]तः ॥ ४४ ॥ अधिदैवविशुद्धिः स्यादुपास्तियज्ञयोगतः । पूर्णाहुतिः पराभक्तावद्वैतभावसंजुषि ॥ ४५ ॥ अध्यात्मशुद्धिः सर्व्वेषां भवति ज्ञानयज्ञतः । अहं ब्रह्मास्मीति चिन्तासिद्धावेवास्य पूर्णता ॥ ४६ ॥ यथाधिकारमेते हि साधयन्तो न योगतः । विच्युताः स्युः कदापीहाऽन्यथा भावेऽन्यथा भवेत् ॥ ४७ ॥ सिद्धान्तानारुरुक्षूणां एतान्निश्चित्य यत्नतः । ईशकोटिकमुक्तानामादर्शं परिचिन्तयन् ॥ ४८ ॥ निष्कामकर्मयोगात्मपरकर्मपरां गतिम् । परां भक्तिं परज्ञानमाश्रयन् मानवः

स्वयम् ॥ ४९ ॥ सम्यक् कृतार्थतामाप्तो जगन्त्यपि कृतार्थतां । नूनं गमयितुं सम्यक् शक्तोत्यत्र न संशयः ॥ ५० ॥ कलिकाल-प्रभावेण सन्न्यासिष्वपि सुव्रताः ! बहवः सम्प्रदायाः स्युर्लिङ्गा-न्यपि च भूरिशः ॥ ५१ ॥ द्वैतभेदनिरासायाऽद्वैतभेदस्य सिद्धये । यः सन्न्यासाश्रमः प्रोक्तस्तत्राज्ञानप्रभावतः ॥ ५२ ॥ मतभेदो लिङ्गभेदोऽहङ्कारस्य भिदा तथा । आचारस्यापि भेदश्च भवि-ष्यति कलौ ध्रुवम् ॥ ५३ ॥ प्रकृतिः कारणं तस्य माया या विश्वमोहिनी । कलौ सन्न्यासभेदा ये तेषां चक्रे पतिष्यताम् ॥ ५४ ॥ भाविन्यधोगतिर्विप्राः ! भवचक्रे विघूर्णिनी । आध्यात्मि-कोन्नतिं तद्वत् लब्ध्वा ज्ञानस्य पूर्णताम् ॥ ५५ ॥ पदश्चाभयमव्यग्रं य इच्छेन्नियतात्मवान् । न पतेदीदृशे सोऽसावविद्यापाशबन्धने ॥ ५६ ॥ सन्न्यासाश्रममभ्येत्य मुमुक्षुर्यदि सम्पतेत् । उक्तेऽ-विद्याचक्रचक्रे तदा कष्टा बहिर्गतिः ॥ ५७ ॥ तन्मायाचक्रतो घोरात् सत्यं सत्यं ब्रवीम्यहम् । ममैतद्वचने पूर्णं विश्वस्तव्यमलं सदा ॥ ५८ ॥ जीवन्मुक्तपदं त[illegible]सिनश्च जगद्गुरोः । पदं प्राप्तुमपेक्ष्येत क्रमन्यासो ध्रुवं ध्रु[illegible] ॥ चतुर्धा संविभक्तोऽसौ पूर्वमुक्तोऽत्र विस्तरात् । स्वाभ[illegible]स्ते चत्वारो विभागाः सम्प्रकीर्तिताः ॥ ६० ॥ यथा [illegible]तिका वर्णाश्रमाद्याः खलु सर्वथा । तेषामेवाश्रयः श्रेयांस्त[illegible]रुदीरितः ॥ ६१ ॥ महर्ष-योऽतिदुर्ज्ञेयं स्वरूपं कर्मब्रह्मणः [illegible]र्मज्ञैर्योगिभिः कर्म विराड्रूपं त्रिधा स्मृतम् ॥ ६२ ॥ सहजं [illegible]मैशं च भावत्रयविभेदतः । ब्रह्माण्डस्य हि संस्कारसमष्ट्य[illegible] यस्य च ॥ ६३ ॥ सम्बन्धः कर्मणस्तिष्ठेत् सहजं कर्म तन्म[illegible]म् । जङ्गमस्थावरसृष्टेर्मूलं कर्मै-तदीरितम् ॥ ६४ ॥ असङ्ख्या देवनिचयाश्चालका अस्य कर्मणः । परिणामः स्थावरेषु क्रमान्मर्त्येतरेषु हि ॥ ६५ ॥ जङ्गमेषु च जीवेषु या क्रमोन्नतिरीदृशी । जायते कारणं तत्र प्रभावो ह्यस्य कर्मणः ॥ ६६ ॥ पिण्डसम्बन्धि यत्कर्म मनुष्यैर्व्यष्टिरूपतः । कृतं सद्भि-स्तत्त्वविद्भिर्जैवं कर्म तदुच्यते ॥ ६७ ॥ नरादयः स्वतन्त्रा वै जीवा एतस्य कर्मणः । निरन्तरं सर्वथैव भवन्ति फलभोगिनः ॥ ६८ ॥

कुर्वन्ति जीवन्मुक्ता यदैशं कर्म तदुच्यते । जीवन्मुक्तः कार्यभूमिरीश्वरेच्छा तु कारणम् ॥ ६९ ॥ ततः कर्म भवेदैशमीशकोटिकमुक्ततः । ईश्वराधीनमेवैतज्जगत्कल्याणहेतवे ॥ ७० ॥ ईशकोटिकमुक्तानां सञ्चितक्रियमाणके । कर्मणी बन्धनेऽनीशे स्वकर्तुस्सर्वथैव हि ॥ ७१ ॥ भविष्यत्कालजनने साहाय्यमधितिष्ठतः । जगतां जीवनायैव जीवन्मुक्तस्य जीवनम् ॥ ७२ ॥ जगत्पवित्रतासिद्ध्यै जीवन्मुक्तस्य कर्म वै । भगवन्महिमख्यातिप्रचाराय निरन्तरम् ॥ ७३ ॥ जीवन्मुक्तकृतोपास्तिः केवलं समुदीरिता । जीवन्मुक्तस्य यज्ज्ञानं तत्त्वज्ञानप्रचारतः ॥ ७४ ॥ जगज्जीवोद्धारणाय केवलं तत्प्रकीर्तितम् । अत एव महाभागा स्तीर्था अपि भवादृशाः ॥ ७५ ॥ जगत्पवित्रयन्तो हि तीर्थेऽटन्त्यनिशं स्वतः । महर्षयः सत्यमेव ब्रवीमि भवतां पुरः ॥ ७६ ॥ जीवन्मुक्ते ब्रह्मणि च न भेदः कोऽपि विद्यते । एतावानेव भेदोऽस्ति मूर्तिमद् ब्रह्म ते मताः ॥ ७७ ॥ तेषां कर्म ब्रह्मकर्म स्मर्यैतैतदहर्निशम् ॥ ७८ [illegible]

इति श्रीसन्न्यासगी[illegible] जीवन्मुक्तविज्ञाननिरूपणं नाम एक[illegible]ायः ॥ ११ ॥

[illegible]दशो[illegible]

द्वा[illegible]ऽध्यायः

स[illegible]

ब्राह्मणानां गुरो ! सन्न्यासिनां तद्वच्छिरोमणे । जगद्गुरोऽद्य भवतः कृपया धन्यतामगात् ॥ १ ॥ इदं तीर्थं तथा सर्वे वयं धन्याः कृतास्त्वया । रहस्यं धर्म्मविज्ञानस्यातिदुर्ज्ञेयमद्भुतम् ॥ २ ॥ पुंसां साधारणो धर्म्मो धर्माङ्गस्य तथैव च । स्वरूपं तेऽनुकम्पातः श्रुत्वा पुलकिता वयं ॥ ३ ॥ प्रबलस्य कले रूपं करालं च विचित्रितम् । श्रुत्वाश्चर्यपराः सर्वे वयं जातास्तपोनिधे ! ॥ ४ ॥ ततोऽतिपुण्यरूपस्य त्रैलोक्यपावनस्य च । सन्न्यासधर्मस्य

विभो! रूपं श्रुत्वा पवित्रिताः ॥ ५ ॥ एवं कुटीचकादीनां चतुर्णां धर्ममुत्तमम्। विशेषं कृतकृत्याः स्म श्रुत्वा सर्व्वं वयं मुने! ॥ ६ ॥ उपदिष्टं त्वया सर्वमिदं नौरेव कीर्तिता। कलिदुस्तरनद्या वै तरणे मुनिपुङ्गव! ॥ ७ ॥ आत्मज्ञानं श्रावयास्मानधुना कृपया विभो!। लक्ष्यस्थैर्यं यतोऽस्माकं संसाराब्धिं तरेम च ॥ ८ ॥

याज्ञवल्क्य उवाच।

सर्वेषां दृश्यवस्तूनां त्रिधा दर्शनमस्ति यत्। आध्यात्मिकाधिदैवाधिभौतिकत्रयरूपतः ॥ ९ ॥ दृश्यकारणरूपाया मायाया वै गुणत्रये। दृष्टिश्च सततं विप्राः! तत्त्वज्ञाने हि कारणम् ॥१०॥ अनादिसान्ता या माया शक्तिः सा परमात्मनः। परमात्मनि लीनायां तस्यामेव हि जायते ॥ ११ ॥ अद्वैतरूपज्ञानस्याविर्भूतिर्योगिनो हृदि। ब्रह्मणोऽभिन्नशक्तिस्तु ब्रह्मैव खलु नाऽपरा ॥१२॥ तथा सति वृथा प्रोक्तं शक्तिरित्यविवेकिभिः। शक्तिशक्तिमतोर्धीराः! भेदाभेदस्तु [illegible] ॥ १३ ॥ सृष्टिर्मतैतज्जगतः शक्तिद्वारैव ब्रह्मणः। द्वैतमेतत्[illegible] द्वैताऽद्वैतविवर्जितम् ॥१४॥ यतो हि कारणब्रह्म भिन्नं न का[illegible]रणा। इत्थं स्थितमिदं विश्वं सदसद्देवरूपि च ॥ १५ ॥ [illegible]दनिर्मुक्तं युक्तं द्वैतैक्यमप्यतः। चितेः कलंकवैरूप्या[illegible] संसारतां गतम् ॥ १६ ॥ अकलंकमसंसारि तच्चाभिन्नाद्वय[illegible]। इयमस्मीति सम्प्राप्तकलंका चिन्निबध्यते ॥ १७ ॥ [illegible]नैव कलां बुध्वा स्वकाङ्क्षिनां विमुच्यते। चिद्र्थाकारताऽ[illegible] च्छित्वात् सत्त्वं समुज्झति ॥ १८ ॥ सुखादि-मिलितां धत्ते न सत्यां सदिति क्षणात्। शुद्धा निरंशा सत्या वाऽसत्या वेत्येवमादिभिः ॥ १९ ॥ विमुक्ता नामशब्दार्थैः सर्वैः सर्वात्मिकाऽपि खम्। सर्व्वं निरुपमं शान्तं मनसैतात्त्रिमार्गगम् ॥ २० ॥ ब्रह्मेदं वृंहितं ब्रह्म शक्त्याकाशविकासया। मनसा मनसि च्छिन्ने स्वेन्द्रियावयवात्मनि॥२१॥ सत्यालोकाज्जगज्जाले प्रच्छन्ने विलयं गते। छिद्यते शीर्णसंसारकलना कल्पनात्मिका ॥ २२ ॥ अष्टबीजोपमा सत्ता जीवस्य इति

नासिका । आसक्तिशून्या भवति पश्यन्ती चेत्य-चर्वणाम् ॥ २३ ॥ मनोमोहाभ्रनिर्मुक्ता शरदाकाशकोशवत् । शुद्धा चिद्भाव-मात्रस्था चेत्यचिच्चापलं गता ॥ २४ ॥ समस्तसामान्यवती भवतीर्णभवार्णवा । अपुनर्भवसौषुप्तपदपाण्डित्यपीवरी ॥ २५ ॥ परमासाद्य विश्रान्ता विश्रान्ता वितते पदे । एतद्वो मनसि क्षीणे प्रथमं कथितं पदम् ॥ २६ ॥ द्वितीयं शृणुत प्राज्ञाः ! शक्ते-रस्याः सुपावनम् । एषैव मनसोन्मुक्ता चिच्छक्तिः शान्ति-शालिनी ॥ २७ ॥ सर्व्वज्योतिस्तमोमुक्ता वितताकाशसुन्दरी । घनसौषुप्तलेखावच्छिलान्तःसन्निवेशवत् ॥ २८ ॥ सैन्धवान्तः-स्थरसवद्वातान्तःस्पन्दशक्तिवत् । कालेन यत्र तत्रैव परां परिणतिं यदा ॥ २९ ॥ शून्यशक्तिरिवाकाशे परमाकाशगा तदा । चेत्यांशोन्मुखतां नूनं त्यजत्यम्भिवव चापलम् ॥३०॥ स्पन्दनं वात-लेखेव पुष्पलेखेव सौरभम् । कालताकाशते त्यक्त्वा सकले सकला कला ॥ ३१ ॥ न जड़ा नाऽजड़ा स्फारा धत्ते सत्तामना-मिकाम् । दिक्कालाद्यन[illegible]महासत्तापदं गताम् ॥ ३२ ॥ तूर्यतूर्यांशकलितामकलङ्क[illegible]म् । काश्चिदेव विशालाक्ष-साक्षिवत् समवस्थिताम्[illegible] ॥ ३[illegible] ॥ सर्व्वतः सर्व्वदा सर्व्वप्रकाश-स्वादुतत्पराम् । एषा द्वि[illegible]तीया [illegible]ता कथिता वः सुधीवराः ॥३४॥ तृतीयं वः प्रवक्ष्यामि पदं [illegible]विदां वराः ! एषा दृक् चेत्यवलना-दनामार्थी पदं गता ॥ [illegible] ब्रह्मात्मेत्यादिशब्दार्थादतीतोदेति केवला । स्थैर्येण कालतः [illegible]ा निष्कलङ्का परात्मना ॥ ३६ ॥ तुर्यातीतादिनामस्वादपि [illegible]पदम् । सापरा परमाकाष्ठा प्रधानं शिवभावतः ॥ ३७ ॥ चिद्रूप्रा निरवच्छेदा तृतीया पावनी स्थितिः । चिरमस्यां प्रतिष्ठायां सर्व्वाध्वाध्वगदूरगा॥३८॥ सा समाप्यङ्ग वचसां न समायाति गोचरम् । सत्यं ब्रह्म जगचैकं स्थितमेकमनेकवत् ॥ ३९ ॥ सर्व्वं वा सर्ववद्भाति शुद्धश्चाऽशुद्ध-वत्ततम् । अशून्यं शून्यमिव च शून्यं वाऽशून्यवत्स्फुटम् ॥ ४० ॥ स्फारमस्फारमिव तदस्फारं स्फारसन्निभम् । अविकारं विकारीव समं शान्तमशान्तवत् ॥ ४१ ॥ सदेवाऽसदिवाऽदृश्यं तदेवाऽत-

दिवोदितम् । अविभागं विभागीव निर्जाड्यं जडवद्गतम् ॥४२॥ अचेत्यं चेत्यभावीव निरंशं सांशशोभनम् । अनहं सोऽहमिव तदनाशमिव नाशवत् ॥ ४३ ॥ अकलङ्कं कलङ्कीव निर्वेद्यं वेद्य-वाहिवत् । आलोकि ध्वान्तघनवन्नववच्च पुरातनम् ॥ ४४ ॥ पर-माणोरपि तनु गर्भीकृतजगद्गणम् । सर्वात्मकमपि त्यक्तदृष्टं कष्टेन भूयसा ॥ ४५ ॥ अजालमपि जालाढ्यश्चाशेषवदनेकधा । निर्मा-यमपि मायांशुमण्डलामलभास्करम् ॥ ४६ ॥ ब्रह्म वित्त विदां-नाथाः ! स्वपामिव महोदधिम् । जगद्रत्नमहाकोषतुलायां तूलकाल्लघु ॥ ४७ ॥ मायामरीचिशशिनमपि नेत्रणगोचरम् । अनन्तमपि निष्पारं न च क्वचिदपि स्थितम् ॥ ४८ ॥ आकाशे वनविन्यास-नगनिर्माणतत्परम् । अणीयसामणीयांसं स्थविष्ठं च स्थवीयसाम् ॥ ४९ ॥ गरीयसां गरिष्ठश्च श्रेष्ठश्च श्रेयसामपि । अकर्तृकर्म-करणमकारणमकारकम् ॥ ५० ॥ अन्तःशून्यतयैवैताच्चिराय परिपूरितम् । जगत्समुद्गकमपि नित्यं शून्यमरण्यवत् ॥ ५१ ॥ अनन्तशैलकठिनमप्याकाशलवान्[illegible] प्रत्येकं प्रत्यहं प्रायः पुराणं पेलवं नवम् ॥ ५२ ॥ [illegible]न्धकाराभं तमस्त्वालोक माततम् । प्रत्यक्षमपि दुर्लक्ष्यं [illegible]मपि चाग्रगम् ॥ ५३ ॥ चिद्रूपमेव च जडं जडमेव चिदा[illegible]कम् [illegible] अहमेवानहम्भावमनहं वाऽहमेव च ॥५४॥ अन्यदेव तदे[illegible]महमेवाऽन्यदेव तत् । अस्य पूर्णार्णवस्यान्तरिमे त्रिभुवनोर्मयः [illegible]॥ स्फुरन्त्य इव तिष्ठन्ति स्वभावद्रवतात्मिकाः । बिभर्ति [illegible]ङ्गस्थं तुषारमिव शुक्लताम् ॥ ५६॥ भाति सर्गस्त[illegible]ण्व शुक्लता । अदेशकाला-वयवोऽप्येष देवो दिवानिशम् ॥५[illegible]॥ असज्जगत्तनोतीव यथा वारि तरङ्गकम् । एतस्मिन् विकसन्तीमा विपुलाकाशकानने ॥ ५८ ॥ जगज्जरठमञ्जर्यः प्रसरत्पत्रपञ्चकाः । एष स्वप्रतिबिम्बस्य स्वयमालोकनेच्छया ॥ ५९ ॥ अत्यन्तनिर्मलाकारः स्वयं मुकु-रतां गतः । व्योमवृक्षफलस्यास्य स्वेच्छावयव उज्ज्वलाः ॥ ६० ॥ त्रैलोक्यात्मनि देदीप्ताः सूर्यचन्द्रादयो ग्रहाः तदु-त्पन्नानीन्द्रियाणि चक्षुरादीनि सर्वथा ॥ ६१ ॥ जीवस्य

सार्वोपालम्भे चमत्कुर्व्वन्ति संविदि । अन्तःस्थेन वहिष्ठेन नाना-
ऽऽनातयात्मनि ॥ ६२ ॥ एष सोऽन्तर्बहिर्भाति भावाभाव-
विभावया । एतद्रूपा पदार्थश्री रेतस्मिन्नेतादिच्छया ॥ ६३ ॥
चमत्करोत्येतदर्थं जिह्वेव स्वास्यकोटरे । ज्ञाता ज्ञानं तथा ज्ञेयं
द्रष्टा दर्शनदृश्यभूः ॥ ६४ ॥ कर्त्ता हेतुः क्रिया यस्मात्तस्मै ज्ञप्त्या-
त्मने नमः । यत्तद्व्यक्तस्थमव्यक्तं विचिन्वन्ति महर्षयः ॥६५॥
क्षेत्रे क्षेत्रज्ञमासीनं तस्मै क्षेत्रात्मने नमः । अपुण्यपुण्योपरमे यं
पुनर्भवनिर्भयाः ॥ ६६ ॥ शान्ता सन्न्यासिनो यान्ति तस्मै
मोक्षात्मने नमः । यस्मात्सर्वाः प्रसूयन्ते सर्गप्रलयविक्रियाः
॥६७॥ यस्मिंश्चैव प्रलीयन्ते तस्मै हेत्वात्मने नमः । अप्रमेय-
शरीराय सर्व्वतो बुद्धिचक्षुषे ॥६८॥ अपारपरमेयाय तस्मै दिव्या-
त्मने नमः । परः कालात्परो यज्ञात्परात्परतरो हि यः ॥ ६९ ॥
अनादिरादिर्विश्वस्य तस्मै विश्वात्मने नमः । आत्मज्ञानमिदं ज्ञानं
ज्ञात्वा पञ्चस्ववस्थितः ॥ ७० ॥ यं ज्ञानेनाऽधिगच्छन्ति तस्मै
ज्ञानात्मने नमः । महतस् [illegible] पारे पुरुषं ह्यतितेजसम् ॥७१॥
यं ज्ञात्वा मृत्युमत्येति तस् [illegible] मने नमः । स्फुरन्ति शीकरा
यस्मादानन्दस्याऽम्बरेऽवनौ । ॥ [illegible] र्वेषां जीवनं तस्मै ब्रह्मा-
ऽनन्दात्मने नमः । यस्मिन् सर्व्वे [illegible] र्वे यः सर्व्वे सर्व्वतश्च
यः ॥ ७३ ॥ यश्च सर्व्वमयो दे [illegible] र्षात्मने नमः । शृणुध्वं
मुनयः सर्व्वे सत्यं सत्यं [illegible] ॥ अस्याः सन्न्यास-
गीतायाः प्रकाशाज्जगतीतल [illegible] गमत्तद्वन्नरजातिः कृता-
र्थताम् ॥ ७५ ॥ इयं तूपनिषत् [illegible] न देया यस्य कस्यचित् ।
देया तु गुरुभक्ताय सदाचारा[illegible]न्वताय च ॥ ७६ ॥ आस्तिकाय
महाभागाः ! सत्यशीलयुताय च अध्यापनं चाध्ययनं यत्राऽस्या
जायते सदा ॥ ७७ ॥ तत्र वाग्देवता ज्ञानजननी ह्युपतिष्ठते ।
अध्यापयति यश्चैनां तस्याऽनेकगुणैर्धते ॥ ७८ ॥ विद्या प्रारब्ध-
कर्मभ्यो महामाहिमशालिनः । अस्यास्तु पुस्तकं यैश्च गृहस्थै
र्दीयते मुदा ॥ ७९ ॥ ऐश्वर्यहीनं न भवेत्तद् गृहं वै कदाचन ।
पाठः प्रवर्त्तते यस्य गृहस्थस्य गृहे सदा ॥ ८० ॥ पुस्तकस्या-

स्य तद् गेहं धनधान्ययुतं भवेत् । विदुषी जायतेऽवश्यं तदीया सन्ततिः सदा ॥ ८१ ॥ वानप्रस्थगणश्चास्याः पाठेन लभते ध्रुवम् । परां काष्ठां तपस्यायाः स्वस्या ज्ञानपरायणः ॥ ८२ ॥ सन्न्यासिनां तु गीतेयं सर्वसिद्धिकरी मता । यदि सन्न्यासिनो ह्यस्याः पाठं कुर्य्युर्निरन्तरम् ॥ ८३ ॥ तापत्रयविनिर्मुक्ता लभन्ते मुक्तिमुत्तमाम् । तथैव परभक्तेस्ते लाभे वै परमात्मनः ॥ ८४ ॥ आत्मज्ञानस्य प्राप्तौ च भवेयुरधिकारिणः । ऋषिश्रेष्ठाः ! अहं मन्त्र मोंतत्सदिति संपठन् ॥ ८५ ॥ समाप्तिं प्रापयामीमं ब्रह्मयज्ञं महत्तमम् । यज्ञे ब्रह्मणि च ज्ञेयो न भेदोऽणुरपि क्वचित् ॥ ८६ ॥ अनन्ता ईरिता यज्ञा ऋषिभिस्तत्त्वदर्शिभिः । द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथैव च ॥ ८७ ॥ स्वाध्यायज्ञानयज्ञाश्च कर्मयज्ञा अपि ध्रुवम् । ब्रह्मप्राप्तिनिदानत्वात् सर्व्वे ब्रह्ममया इमे ॥८८॥ एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे । कर्म्मजान् विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यथ ॥ ८९ ॥ ब्रह्मार्पणं ब्रह्महविर्ब्रह्माऽग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्म समाधिना ॥ ९० ॥

इति श्रीभगवद्दत्तार्य चिदा[illegible]र्यां श्रीसन्न्यासगीतायां
आत्मस्वरूपनि[illegible]दशोऽध्यायः ॥ १२ ॥

हिन्दू-जातिका संगठन ।

हिन्दू-जातिके सामाजिक संगठन, धर्मोन्नति और ऐक्यके उद्देश्यसे श्रीमहामंडलने सदस्य होनेका बहुत सुगम उपाय निकाला है। प्रत्येक हिन्दू नरनारी महामंडलके सदस्य हो सकते हैं। प्रत्येक मेम्बरको एक खास फार्म भरकर भेजना होता है अथवा पत्र द्वारा सूचित करना होता है कि वे सदस्य होना चाहते हैं। सदस्योंको केवल एक रुपया साल चन्दा देना होता है। उनको एक त्रैमासिक त्रैभाषिक पत्र विना मूल्य मिलता है। इस पत्रके द्वारा समाज-संगठन, धर्मोन्नति और शिक्षाके विषयोंमें सदस्योंको सहायता मिलती है। सदस्योंको एक सदस्य मानपत्र भी मिलता है तथा कई सुविधायें भी प्राप्त होती हैं। अतः सविनय निवेदन है कि चाहे साधु हों, चाहे गृहस्थ और चाहे पुरुष हों, चाहे स्त्री, सबको सामाजिक संगठन, स्वजातीय ऐक्य और धर्मोन्नतिके लिये श्रीमहामंडलका सदस्य होना उचित है। प्रत्येक स्थानमें कमसे कम ७ सदस्य मिलकर श्रीमहामंडलकी शाखासभा खोल सकते हैं जिनको कई प्रकारकी सहायता मिलती है।

पत्र भेजनेका पता—

मंत्री, श्रीभारतधर्ममहामंडल कार्यालय, बनारस केण्ट।

श्रीमहामंडल [illegible]क महाविद्यालय ।

श्रीभारतधर्म महामंडल प्रधान का[illegible] गृहस्थ सबको धर्मज्ञान लाभ करनेके लिये और धर्मोपदेशक और धर्मसेव[illegible] श्रीमहामंडल उपदेशक महाविद्यालयके नामसे एक विद्यालय स्थापि[illegible] के लिये छात्रवृत्ति भी दी जाती है और ठहरनेके लिये छात्र[illegible]।

श्रीमहामंडल उपदे[illegible] और अमावस्याको धार्मिक व्याख्यान होते हैं। जिसमे [illegible] हो सकते हैं। प्रति सोमवारको धर्म-जिज्ञासुगण उपस्थित होकर धर्म-सम्बन्ध[illegible] जिज्ञासा कर सकते हैं। द्विजमात्रके प्रार्थना करने पर उनको 'गायत्रीमन्त्रकी सरल टीका' विना मूल्य दी जाती है। संन्यासी साधु तथा किसी श्रेणीके गृहस्थ हों पत्र द्वारा धर्म विषय में जिज्ञासा करने पर उनका यथोचित समाधान किया जाता है। उसके लिये एक अलग कार्य-विभाग स्थापित है।

पत्र भेजनेका पता—

मंत्री, श्रीभारतधर्ममहामंडल प्रधान कार्यालय,
जगतगंज, बनारस केण्ट।

श्रीमहामंडलका विश्वविद्यालय ।

श्रीभारतधर्ममहामंडलके द्वारा धर्मशिक्षा विस्तार और जगतकी आध्यात्मिक उन्नतिके विचारसे धार्मिकाध्यात्मिक संस्कृत-विश्वविद्यालय नामसे एक विश्वविद्यालय स्थापित है। इसके परीक्षा-केन्द्र हरेक जगह तथा प्रसिद्ध मठ मन्दिरों आदिमें स्थापित हो सकते हैं। विद्या-प्रेमी सज्जनोंको नियमावली मंगाकर अपने यहाँ परीक्षा केन्द्र खोलना उचित है। इसके अतिरिक्त इस विश्वविद्यालयका सहयोगीसभ्य हरेक गृहस्थ हो सकता है। उनको एकवार केवल १) देना पड़ता है और फार्म भरना पड़ता है, तथा यह स्वीकार करना पड़ता है कि अपने घरके बालक बालिकाओंको बालकपनसे ही धर्म-शिक्षा देंगे। उनको एक प्रमाणपत्र भी दिया जाता है। ऐसे मेम्बरोंको ८-१० ऐसी पुस्तिकायें दी जाती हैं, जो बालक-बालिकाओंको प्रारम्भिक धर्मशिक्षा देनेमें काम आवें। प्रत्येक हिन्दू गृहस्थको इस धार्मिक विश्वविद्यालयका सहयोगी सभ्य बनना उचित है।

केन्द्राध्यक्षोंको सुविधा ।

अखिल भारतवर्षीय संस्कृत-विश्वविद्यालयके केन्द्राध्यक्षोंको निम्नलिखित सुविधायें प्राप्त होंगी। (१) जिन जिन स्थानोंमें स्वतन्त्र परीक्षा केन्द्र होंगे अथवा जहाँ-जहाँ स्कूल, कालेज, पाठशालाओं आदिमें वार्षिक परी[illegible]का प्रबन्ध होगा उस स्थानमें यदि सदस्य संख्या अधिक होगी अथवा [illegible]महामंडलके प्रतिनिधि या संरक्षक होंगे तो उनकी सिफारिशसे परीक्षाशुल्कमें कमी हो सकेगी अथवा अधिक संख्यामें, माफी भी हो सकेगी। (२) उस केन्द्रके मार्फत धर्म-पुस्तकें बिकेंगी तो केन्द्राध्यक्षोंको यथे[illegible]षिक मिलेगा। (३) केन्द्राध्यक्षोंको श्रीमहामंडलके मानदान विभागसे किसी स्[illegible]व्यक्तिको स्वजातीय मान दिलानेके लिये प्रस्ताव करनेका अधिकार होगा। [illegible]ंग्रह तथा अन्यश्रेणीके सभ्यसंग्रह करने पर उनको यथेष्ट [illegible] (५) परीक्षाकेन्द्रकी विशेष सफलता होने पर वे आर्थिक सहा[illegible]प्ति के भी अधिकारी होंगे।

[illegible] भेजनेका पता—

[illegible]विद्यालय विभाग,

[illegible]गंज, बनारस केण्ट।

सनातनधर्म[illegible] सरलभाषामें प्रकाशित स[illegible] पुस्तकें ।

धर्मविज्ञान २), सप्तशती गीता (भाषानुवाद तथा विस्तृतभाषाभाष्यसहित) १), गीतार्थ-चन्द्रिका (भगवद्गीताका अनुवाद तथा अपूर्व भाषाभाष्यसहित) २॥), परलोकतत्त्व ॥), धर्मतत्त्व ।॥), भारतधर्मसमन्वय ।॥), कन्या-शिक्षा-सोपान -), सदाचारप्रश्नोत्तरी -)॥, आचारचन्द्रिका ॥), सरलसाधनप्रश्नोत्तरी =), सतीसदाचार ॥), व्रतोत्सव कौमुदी ।=), कर्मरहस्य ।॥), पूजा और प्रार्थना =)॥, धर्म-प्रवेशिका ।)।

मैनेजर वाणी पुस्तकमाला

आर्यमहिला कार्यालय, जगतगंज, बनारस केण्ट।

सिर्फ टाइटिल ल. ना. प्रेस, काशी में छपा।

...जाने के बाद में सरकार विरोधी
ने मुक्त कर लिया।
सैगान में बौद्ध नेताओं ने कल
जनता को किसी भी परिस्थिति
सामना करने के लिए सचेत
ा। बौद्ध नेताओं ने एक वक्तव्य
ाशित कर कहा है कि प्रधान
त्री की द्वारा आम चुनाव किये
े का वचन दिया गया गया था
से बौद्धों ने मैत्री पूर्ण रुख
नाया था लेकिन अब बौद्धों का
की, सरकार द्वारा टालमटोल
े जाने से टूट चुका है।

●

क (पढ़ाई दो पाली में)

ंग क्लास

सड़क, वाराणसी — १
फार्मेसी
में, आटा चक्की के पास
ई : १ जुलाई से
ातः । ६ से ८ बजे सायं
ापिकाओं, महिला क्लार्क
की

क का दाग मिटाने
ता है

मसी

ली, वाराणसी
स के सामनेवाली गली में

ार १६ मई, ५ बजे शाम में

) ३१६.७२	फी० किलो	
३३८.४०	,,	
) ३६५.००	,,	
८८.००		

ाराणसी (फोन नं० ३१७३)

अरोड़ा की ओर से मुद्रक
द्वारा गांडीव यन्त्रालय

रखना ही मूलता है। एक वक्ता ने कहा कि कोरे प्रस्ताव करने से काम नहीं चलेगा बल्कि यहां भी केरल और कलकत्ते की तरह 'काशी बंद' का नारा तथा जनता को संगठित करना चाहिये प्रान्तीय सरकार द्वारा अधिनियमेंट के तरीकों पर क्षोभ प्रगट किया गया तथा उसमें व्याप्त भ्रष्टाचार से त्रस्त जनता को बचाने के लिये संघर्ष की आवश्यकता व्यक्त की। उत्तेजनापूर्ण वातावरण में निम्नलिखित प्रस्ताव सर्वसम्मति से पारित किया ग ा।

प्रस्ताव

'आस्था' की यह बैठक सर्वसम्मति से यह निश्चय करती है कि भूमि भवनकर अनुचित है क्योंकि प्रान्तीय सरकार ने जो भूमि-भवनकर आपत्कालीन स्थिति के कारण लगाया था वह अब नहीं रहा। साथ ही जनता की करदेय क्षमता भी बहुत गिर गई है। अतः यह समिति प्रान्तीय सरकार से अनुरोध करती है कि वह भूमि-भवन कर तत्काल वापस ले ले तथा समय रहते जनसंघर्ष स्थिति से अपने को बचा लें।

आस्था के सदस्य यह अनुभव करते हैं कि यह विषय राजनैतिक नहीं है और न किसी दल विशेष से सम्बन्धित बल्कि सर्वसाधारण की समस्या है जिसका हमें दलगत दलदल से उपर उठकर संगठित रूप से सामुहिक विरोध करना है। आस्था समस्त दलों से अनुरोध करती है कि वे इस कार्य में हमारा हाथ मजबूत करें।

उ० प्र० राज्य कर्मचारी संयुक्त परिषद की सूचना

काशी, १६ मई। उत्तर प्रदेश राज्य कर्मचारी संयुक्त परिषद के जिला इकाई वाराणसी के कार्यकारिणी समिति का चुनाव गत...

...सामने प्रदर्शन करने के अभियोग में निलम्बित कर दिया है।

गत ५ मई को संघ के तत्वावधान में अध्यापकों ने प्रदर्शन किया था उनकी मांग है कि महापालिका के अन्य कर्मचारियों की भांति अध्यापकों को भी १०) मासिक की वृद्धि दी जाय।

इस संबंध में नगर महापालिका वेसिक शिक्षक संघ के कार्यकारिणी की बैठक हुई। बैठक में स्वीकृत प्रस्ताव में कहा गया है कि मंहगाई भत्ते की वृद्धि के लिये अध्यापकों के वैधानिक आन्दोलनको शिथिल करने के लिए प्रतिनिधियों को निलम्बित किया गया है। अतः प्रस्ताव में यह निश्चय किया गया है कि इस दमनात्मक रवैये के विरुद्ध हर संभव वैध आन्दोलन प्रारम्भ किया जाय।

शिक्षक संघ की बैठक आगामी वर्ष के लिये निम्नलिखित पदाधिकारी चुने गये। सर्वश्री रमाकान्त मिश्र अध्यक्ष, श्रीमती शान्ति मेहरोत्रा उपाध्यक्ष, शिवनाथ गिरि—मन्त्री, उदयराज द्विवेदी—उपमन्त्री, बनवासी लाल—संगठनमन्त्री, तथा बृजबिहारी लाल—कोषाध्यक्ष चुने गये।

मगर उस दिन प्रत्येक कार्यालय में अवकाश हो जाने के कारण वह न हो सकी उसी दिन तदर्थ समिति ने यह सर्व सम्पति से निर्णय किया कि अगले मंगलवार दिनांक १७.५.६६ को उपरोक्त स्थान पर जिला इकाई का चुनाव किया जाये ताकि लखनऊ में हुए निर्णय के अनुसार इस मास के कार्यक्रम को सुचारु रूपसे चलाया जा सके।

अतः प्रत्येक कार्यालय के कर्मचारियों से अनुरोध है कि १७ मई को अपने कार्यालय से चतुर्थ प...